वर्षम्-१ अङ्कः-२

# संस्कृतवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

युगाब्दः ५११० वैक्रमाब्दः २०६५ आषाढशुक्ल २ – पौषशुक्ल ४ शकः १९३० अक्टूबर – दिसम्बर २००८



कौमुदीमहोत्सवे ग्रन्थलोकार्पणं कुर्वन्तो संस्थानस्य उपाध्यक्षचरा सरोजिनी महिषी, मध्ये: सुप्रसिद्धः श्रीनिवासरथः, अभिराजराजेन्द्रमिश्रः, सर्ववामतः राधावल्लभत्रिपाठी



कौमुदीमहोत्सवे भाषमाणः पूर्व-राज्यशिक्षामन्त्री श्री शुक्लः, महेशचन्द्रशर्मा:, रामदत्तः, मिथिलाप्रसादत्रिपाठी, राजेन्द्रमिश्रः, राधावल्लभत्रिपाठी



संस्कृतवार्तायाः प्रथमाङ्कस्य लोकार्पणं कुर्वन्तः विशिष्टाः - वामतः राजेन्द्रमिश्रः, राधावल्लभत्रिपाठी, नामवरसिंहः, रामकरणशर्मा, श्रीमती रीना चटर्जी

## सम्पादकीयम्

संस्कृतवार्तायाः द्वितीयोऽयमङ्कः। प्रवेशाङ्कस्य संस्कृतसमाजे उदारहृदयैः सहृदयैः सर्वथा स्वागतं विहितम्। एवंविधेन सदुत्साहसंवर्धनेन अनुगृहीतः राष्ट्रियसंस्कृत-संस्थानपरिवारः।

संस्थानस्य राष्ट्रव्यापि-विविध-कार्यक्रमेषु केचन नवीना उपक्रमाः ऐषमः संयोजिताः। तथाहि – कौमुदीमहोत्सवे सुप्रसिद्धानां मान्यानां नाट्यनिर्देशकानां आमन्त्रिताः प्रस्तुतयः, कालिदासाकादेम्याः सहयोगेन राष्ट्रियसंस्कृतनाट्यमहोत्सवः, युवमहोत्सवः, नाट्यायितमिति शीर्षकेण भारतीयनाट्यपरम्परायाः पुनराविष्कारार्थं नाट्यप्रस्तुतीनां ताभिः सह परिसंवादस्य च प्रवर्तनं, संस्थानस्य स्थापनादिवसमहोत्सवः इत्यादयः।

संस्थानस्य दशसु परिसरेषु गरली-जयपुर-भोपाल-इलाहाबाद-लखनऊ-गुरुवायूरु-शृङ्गेरीषु संस्थिताः सप्त परिसरा इदानीं यावत् मया अवलोकिताः। एतेषु परिसरेषु संस्कृतशास्त्रपरम्परा जागर्ति। छात्रेषु संस्कारा उप्यन्ते। ज्ञानविज्ञानयोः नूतनसाधनानां सङ्गणकादीनामपि प्रयोगे दक्षता विधीयते। अथ च – क्रीडा-व्यायामादीनामपि गतिविधयः इदानीं समधिकतरं प्रोत्साहिताः।

संस्थानद्वारा प्राप्तेन साहाय्येन ऊनविंशतिमहाविद्यालया आदर्शकोट्यां परिगणितास्तथैव चत्वारि आदर्शशोधसंस्थानानि च सञ्चाल्यन्ते। एतासु अपि संस्थासु काश्चन मया विगतचतुर्मासेषु अवलोकिताः। सर्वत्र संस्कृतविद्यायाः बलवती सम्भावना साक्षात्कृता। वस्तुतः संस्कृतभाषाया अभ्युत्थानस्य अभूतपूर्वः कश्चन अयं समयः।

संस्थानस्य कुलपतिकार्यधुरं वहतो मे चत्वार एव मासा अतीताः। अस्मिन् अवधौ उन्मुक्तः सहयोगः मानवसंसाधनविकासमन्त्रालयस्य समादरणीयानां मन्त्रिवर्याणां तत्रत्या-नामधिकारिणां तथैव च संस्थानस्य सर्वेषां प्राचार्याणामधिकारिणां कर्मचारिणां च प्राप्तः। एतस्य कृते कृतज्ञता ज्ञाप्यते।

अथ नवीने सहस्राब्दे संस्थानस्य का स्वप्नदृष्टिः, किं ध्येयं, किं च लक्ष्यं स्यात् इति प्रश्नः संस्कृतवार्तायाः पूर्वस्मिन् सम्पादकीये मया उत्थापितः। न तद्विषये कापि प्रतिक्रिया प्राप्ता। मम दृष्टौ संस्कृतेन अन्ताराष्ट्रियस्तरे गौरवमयस्य स्थानस्य लब्धिरिति स्वप्नदृष्टिः, तदन्तर्वर्तिनीनां समस्तानां विद्यानां शास्त्रपरम्पराणां पुनराविष्कारः पुनर्विकासः पुनर्नवीकरणं चेति ध्येयं, सहस्रप्रायाणां प्रमुखसंस्कृतग्रन्थानां प्रामाणिकसंस्करणानां ई-पाठ्यचर्यायां वेबसाइटमध्ये च निवेश इति लक्ष्यं स्यात्।

-राधावल्लभः

**मुख्यपरामर्शदाता**
प्रो. राधावल्लभः त्रिपाठी
कुलपतिः
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

**परामर्शदातृमण्डलम्**
डॉ. हिन्दकेसरी, जयपुरम्
डॉ. एन्. आर्. कण्णन्, लखनऊ
डॉ. जि. गङ्गन्ना, पुरी
डॉ. कमलचन्द्रयोगी, मुम्बई
प्रो. रामानुजदेवनाथः, शृङ्गेरी
प्रो. विश्वमूर्तिशास्त्री, जम्मू
प्रो. सुरेन्द्रझाः, गरली
प्रो. प.ना. शास्त्री, भोपालम्
डॉ. शैलकुमारी मिश्रा, इलाहाबादम्
प्रो. के.टी. माधवन्, गुरुवायूरु

**सम्पादकमण्डलम्**
डॉ. शुक्ला मुखर्जी
डॉ. प्रकाशपाण्डेयः
डॉ. रत्नमोहनः झा
कु. वेङ्कटेशमूर्तिः



प्रकाशकः
**राष्ट्रियसंस्कृतसंस्थानम्**
(मानितविश्वविद्यालयः)
56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी,
नवदेहली-110058
011-28524993, 28521994, 28520977
email : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in

## प्रतिवार्ता



- जयति सम्प्रत्यपि राष्ट्रियसंस्कृतसंस्थानपरिवारः। जयति चास्माकीनाऽधन्या-ऽनन्या नित्यनूतना मनोवचोवपुःसंस्कारिणी संस्कृतपरम्पराऽमरा। जयति च तथैव कुलपतेराध्यक्ष्ये विभूषितं 'संस्कृतवार्ता'- विद्वत्सम्पादकमण्डलम्।

भवद्प्रेमवशंवदः
रामकरणशर्मा

- तत्रभवताऽऽचार्येण प्रहितं पत्रम् ससंस्कृतवार्तं प्राप्यत। संस्कृतवार्तायाः बाह्याभ्यन्तरकलेवरं दर्शं दर्शं प्रमोदस्समजनि। तत्रभवतस्समास्थभस्सदृशोदय इति निश्चप्रचम्। साफल्याय प्रवृत्तेभ्यस्सर्वेभ्यो विद्वद्भ्यः परिसरकुटुम्बस्य नमोभणितिरभिनन्दनततिश्च सादरहर्षं विज्ञाप्येते।

यथादेशं प्रवर्धमानदण्डः, सिंहावलोकनं, परिसरकुटुम्बस्यानन्यसामान्या उपलब्धयश्चेति त्रिष्वंशेषु वार्ताः सङ्गृह्य प्रेष्येरन् परिसरसम्बन्धिभिरितरवार्ताविशेषैस्समं यथाकालम्।

किञ्चिदिह शास्त्रं - काङ्क्षमह इति सम्पादकीये चरमं पदम्। घुषेर्हसन्ताः परस्मैपदिन इति दीक्षितो यथापाणिनीयम्। न क्वाप्यस्यान्यथा प्रयोगो दृश्यते। कथन्तर्हि काङ्क्षे वचनं नवेत्यादिः? धातोर्नाम च पाठेनैवेष्टसिद्धेरिदित्करणं क्वचिदन्यथेत्यत्र ज्ञापकमिति केचित्। किञ्च तर्कवाचस्पतिस्तु स्वकृतौ अस्यात्मनेपदित्वमिच्छन्तीति। उभयमूलं तु मृग्यमेव। काङ्क्षमाण इत्यादिश्चानशान्त इति वक्तुमस्ति युक्तिः, न परं लङादिषु तथा।

सहयोगिन इत्यस्याधः प्राचार्याणां नामानि। सार्थक एव प्रयोगः। तथापि पदान्तरं साधीयः स्यादिति मे मतिः। परिसरोन्नत्यादेशान् प्रतीक्षमाणेन तत्रभवत आचार्यकुलश्रेष्ठस्यागमनं च सततं विमृश्यते।

इत्थं भावुकः,
रामानुजदेवनाथः

'संस्कृतवार्ता'-सम्बद्धं स्वीयाभिप्रायम्, अत्र प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित-ईमेल् सङ्केतेन प्रेषयन्तु-
**samskritavarta@gmail.com**

## 2008 वर्षस्य राष्ट्रपतिपुरस्काराय घोषिताः संस्कृतविद्वांसः

भारतसर्वकारेण 2008 वर्षस्य राष्ट्रपतिपुरस्काराय चितानां संस्कृतविदुषां नामानि 15.8.2008 दिनाङ्के प्रकटितान्यासन्। अभिनन्द्याः अभिवन्द्याश्च ते विद्वांसः इमे–

**संस्कृते**

1. आचार्यः के. हयवदनपुराणिकः
2. डा. विष्णुभट्ट-सुब्रह्मण्यशास्त्री
3. डा. उमारमणझाः
4. आचार्या श्रीमती अरुणा गोयल
5. श्री नरदेवशास्त्री
6. डा॰ एम्. इ. रङ्गाचार्
7. डा॰ केशवरावमुसलगांवकरः
8. श्रीमती सरोजा भाटे
9. पण्डित-वैकुण्ठविहारीनन्दा
10. पण्डित-सत्यनारायणशास्त्री
11. श्री अनन्तकृष्णन् शिवरामकृष्णशास्त्री
12. श्री जनार्दनपाण्डे
13. पण्डित-पुरुषोत्तमत्रिपाठी
14. श्री भवानीप्रसादभट्टाचार्यः
15. डा॰ सीतानाथ-आचार्यः

**पाली/प्राकृत-विषये**

1. आचार्यः गोकुलचन्द्रजैनः

**महर्षिबादरायणव्याससम्मानः**

1. आचार्यः के. रामसुब्रह्मण्यम्

# स्थापनादिवसमहोत्सवः

## संस्थानस्य 38 वर्षाणि परिपूर्णानि




स्थापनादिवसमहोत्सवे राधावल्लभत्रिपाठी, नामवरसिंह, रामकरणशर्मा च

आसंस्थापनात् अनुदिनम् एधमानेन राष्ट्रियसंस्कृतसंस्थानेन 38 वर्षाणि समतीत्य 39तमे वयसि पादार्पणं कृतम्। प्रसङ्गमेनं निमित्तीकृत्य 15-10-2008 तमे दिनाङ्के संस्थानमुख्यालये आयोजिते स्थापना-दिवससमारोहे आचार्यः रामकरणशर्म-महाभागः सश्रद्धं सम्मानितः। शर्ममहाभागं संस्थानस्य संस्थापक-निदेशकत्वेन, विद्वद्ग्रेसरत्वेन, कवितल्लजत्वेन, सहृदयत्वेन, संस्कृतकुलभूषणत्वेन च संवर्ण्य संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठिमहोदयः प्रशस्तिपत्रवाचनपुरस्सरं श्रीफलोत्तरीयादिभिः तं सम्मानयत्। सम्मानोत्तरम् आशीर्वचनं प्रयच्छन् रामकरणशर्ममहोदयः संस्थानस्य चिरस्मरणीयम् इतिहासं स्मारितवान्। संस्थानस्य च प्रतिष्ठापनावसरे वीरराघव-भक्तदर्शनप्रभृतिभिः भारतशासनस्य वरिष्ठाधिकारिभिः कृतं महान्तं सहयोगं विवृतवान्। तेनोक्तं यत् सर्वारम्भे तु षट् केन्द्रीयसंस्कृतविद्यापीठानि भारते विभिन्नराज्येषु पृथक् पृथक् स्थितान्यासन्। सर्वेषामेतेषां प्रबन्धसमितयश्च पृथगेवासन्। पश्चात् सर्वेषां विद्यापीठानां समन्वयनाय संस्कृतकार्याणां विशेषस्फूर्तिप्रदानाय च सहकारिसमिति (Apex body)-रूपेण राष्ट्रियसंस्कृतसंस्थानं 1970 तमे वर्षे अक्टोबर-मासस्य 15 दिनाङ्के प्रतिष्ठापितमभूत् इति। भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनम् इदं संस्थानम् आदौ मन्त्रालयस्य 'शास्त्रिभवनस्य' उपभवने परिमिते स्थले प्रारब्धमभूत्। ततः प्रभृति निरन्तरं विकासपथे वर्धमानं संस्थानं विविधराज्येषु विकसितैः स्वाङ्गभूतैः परिसरैः सह मानितविश्वविद्यालयत्वेन परिणतं सत् संस्कृतसेवां वितन्वत् अद्य राजते इत्येवं हृद्गतम् आनन्दमपि प्राकटयत्।

अस्मिन् एव कार्यक्रमे संस्कृत-हिन्द्योरन्तःसम्बन्धविषये विचारं प्रस्तोतुं हिन्दीजगति ख्यातनामा साहित्यिकः श्रीमान् नामवरसिंहः समाहूत आसीत्। भाषमाणः सः वर्णितवान् यत् 19 शताब्दे, 20 शताब्दस्य पूर्वार्धे च ये उत्कृष्टाः हिन्दीसाहित्यिकाः कवयः विद्वांसो वा आसन्, तेषां सर्वेषां संस्कृतेऽपि अप्रतिमं पाण्डित्यम् आसीत् इति। संस्कृतप्राकृतयोः विषये गुलेरी-प्रभृतीनां कवीनाम् अभिमतं प्रस्तुत्य तत्सम-तद्भवशब्दविषयकविचारे स्वाभिमतं विस्तरेण सः उपन्यस्तवान्।

कार्यक्रमस्यान्ते अध्यक्षभाषणे कुलपतिमहोदयः अवदत् यत् विविधप्रान्तीयभाषाणां तत्साहित्यस्य संस्कृतस्य च अन्तःसम्बन्धविषये विचारसरण्याः प्रवर्तकम् अस्ति इदं व्याख्यानम् इति। इतरभारतीयभाषाणां मूर्धन्याः विद्वांसः बहवः संस्कृते अपि जीवत्साहित्यनिर्माणमकुर्वन्। तादृशसाहित्येषु यः जीवत्संवादः, समसामयिकविचारः, प्रस्तुतिशैली, सामाजिकानां भावाभिव्यक्तिप्रकारविशेषो वा वर्तते तद्विषये अस्माभिः दृष्टिः प्रसारणीया। एतेन संस्कृतस्य समाजसम्बद्धं स्फूर्तिमत् स्वरूपं विशदं स्याद् इत्यपि कुलपतिवर्येण प्रत्यपादि।

### अनौपचारिकसंस्कृतशिक्षणवार्ता

अनौपचारिकसंस्कृतशिक्षणकेन्द्रेषु अध्यापनार्थं विशिष्टं पुस्तकमेकं सज्जीक्रियमाणमस्ति। माननीय-कुलपतिमहोदयस्याध्यक्ष्ये संस्थानमुख्यालये दिसम्बर-मासस्य 3-4-5 दिनाङ्केषु प्रवृत्तोपवेशने अयं निर्णयः जातः। उपवेशनेऽस्मिन् डा. हिन्दकेसरी, आचार्यः रामानुजदेवनाथः, आचार्यः चान्दकिरणसलूजः, विद्वान् जनार्दनहेगडे, डा. ललितकुमारत्रिपाठी च उपस्थिताः आसन्। अनौपचारिकसंस्कृतशिक्षणकेन्द्राणां कार्यं लक्ष्यम् अध्येतॄन् च मनसि निधाय सहजभाषाधिगमपद्धतिम् अवलम्ब्य पुस्तकस्य निर्माणं स्यात् इति निर्धारितम्। पुस्तकस्यास्य लेखनार्थम् अचिरादेव कार्यशालायाः आयोजनं भविष्यति।

### नाट्यप्रस्तुतिविमर्शिणी कार्यशाला

संस्थानमुख्यालये नवम्बरमासस्य अष्टमे अहनि नाट्यप्रस्तुतिविषयिणी कार्यशाला प्रवृत्ता। कुलपतिमहोदयस्याध्यक्ष्ये प्रवृत्ते कार्यक्रमे राष्ट्रिय-नाट्यविद्यालयात् समागतः श्री राजन्महोदयः, श्रीमती रञ्जना राजन्, विधु खरे महोदया, डा. बलदेवानन्दसागरमहोदयः च विशेषतः समाहूताः आसन्। ऐषमः कौमुदीमहोत्सवे प्रदर्शयितुम् उद्दिष्टनाटकानां निर्देशकाः संस्थानस्य विभिन्न-परिसरीयाध्यापकाः तस्यां कार्यशालायां भागमगृह्णन्। नाट्यानां प्रयोगात्मकपक्षमवलम्ब्य विविधविषयेषु चर्चा तत्र प्रवृत्ता। पूर्ववर्षेषु संस्थानेन कौमुदीमहोत्सवादिषु मञ्चितनाटकानां गुणावगुणविषये, इतोऽपि उत्कृष्टतरप्रदर्शनानां निमित्तं छात्राणां कौशलं कथं संवर्धनीयम् इत्यादिविषये च कुलपतिवर्यस्य, नाट्यविद्यालयात्समागतविदुषां च परामर्शाः प्रतिभागिभिः प्राप्ताः। अपराह्णे राष्ट्रियनाट्यविद्यालयं गत्वा नाटकाभ्यासस्य प्रात्यक्षिकमपि प्रतिभागिभिः विद्वद्भिः समवलोकितम्।

## विद्यापरिषदः सङ्घटनम्

24-11-08 दिनाङ्के प्रवृत्ते प्रबन्धनपरिषदः उपवेशने संस्थानस्य विद्यापरिषदः सङ्घटनमनुमोदितम्। **कुलपतेः राधावल्लभत्रिपाठिमहोदयस्य आध्यक्ष्ये** इयं विद्यापरिषत् कार्यं निर्वक्ष्यति। तत्र **संस्थानाध्यक्षेण नामिताः त्रयः** (1) आचार्या दीप्तीत्रिपाठी, देहली (2) आचार्यः पी.सी. मुरलीमाधवन्, कालडी (3) आचार्यः उमाशङ्करशर्मा पटना, संस्थानस्य एकः सङ्कायप्रमुखः डा. एन्. आर्. कण्णन्, **संस्थानस्य पञ्चदश विभागाध्यक्षाः**–व्याकरणे - आचार्यः आजादमिश्रः (भोपालम्), साहित्ये - आचार्यः के.टी. माधवन् (गुरुवायूरु), मीमांसायाम् - डा. एस्.वी.भट्टः (शृङ्गेरी), शिक्षाशास्त्रे - आचार्यः पी.एन्. शास्त्री (भोपालम्), साङ्ख्ययोगे - डा. जी.पी. दास (पुरी), अद्वैतवेदान्ते - आचार्यः के.वी. सुब्बरायुडु (पुरी), जैनदर्शने - डा. एस्.के. सिङ्घै (जयपुरम्), ज्योतिषे - आचार्यः इन्द्रमणिदासः (जम्मू), न्याये - डा. वैद्यनाथझाः (जम्मू), धर्मशास्त्रे - डा. कमलनारायणशर्मा (जयपुरम्), सर्वदर्शने - डा. के.रघुनाथः (जम्मू), बौद्धदर्शने - डा. विजयकुमारजैनः (लखनऊ), आङ्ग्ले - श्री एस्.वी.रमणमूर्तिः (पुरी), हिन्द्याम् - डा. शिशिरपाण्डे (लखनऊ), पुराणेतिहासे डा. फकीरमोहनपण्डा (पुरी), **संस्थानस्य अष्टौ आचार्याः**-आचार्यः आर्. एन्. दासः (गरली), आचार्यः यशपालखजूरिया (जम्मू), आचार्यः ए.पी. सच्चिदानन्दः (शृङ्गेरी), आचार्यः वासुदेवशर्मा (जयपुरम्), आचार्यः सर्वनारायणझाः (लखनऊ), आचार्यः अर्कनाथचौधरी (जयपुरम्), आचार्यः लक्ष्मीनारायणशर्मा (जयपुरम्) आचार्यः एम्. ए. बाबू (गुरुवायूरु) **संस्थानस्य त्रयः प्रवाचकाः** - डा. पी.जी. श्रीनिवासन् (गुरुवायूरु) डा. शैलकुमारी मिश्रा (इलाहाबाद), डा. रत्नेश्वरमिश्रः (पुरी), **संस्थानस्य त्रयः वरिष्ठव्याख्यातारः** - श्री एस्. सुब्रह्मण्यशर्मा (गुरुवायूरु), डा. अनुपम मुखी (पुरी), डा. प्रभातकुमारमहापात्रः (पुरी), च सहकारिसदस्याः भवन्ति। विद्यापरिषदियं वर्षद्वयं यावत् प्रभावशालिनी स्थास्यति।

## पुनर्घटिता प्रकाशनसमितिः

संस्थानस्य पुनर्घटितायाः प्रकाशनसमितेः प्रथमम् उपवेशनं 30-9-08 दिनाङ्के संस्थानमुख्यालये समपद्यत। कुलपतिवर्यस्य राधावल्लभत्रिपाठिमहोदयस्य आध्यक्ष्ये सम्पन्ने उपवेशने आचार्यः इन्द्रनाथचौधरी, आचार्यः गयाचरणत्रिपाठी, आचार्यः त्रिविक्रमनारायण-धर्माधिकारी, शोधप्रकाशनविभागस्य सहायककुलसचिवः इत्येते समितिसदस्याः उपस्थिताः आसन्। आचार्यः वागीशशुक्लः अत्र विशेषतया आमन्त्रितसदस्यः आसीत्।

### संस्थानप्रकाशने अङ्कुरिताः नवीनाः ग्रन्थमालाः

प्रकाशनसमित्या कृतनिर्णयानुसारं इमाः तिस्रः नवीनाः ग्रन्थमालाः संस्थानेन समारब्धाः

1. **लोकप्रियसाहित्यमाला** – सर्वजनबोध्यानां सरलानां नवीनानां कृतीनां प्रकाशनाय।
2. **शास्त्रीयग्रन्थमाला** – गभीरशास्त्रग्रन्थानां भाष्य-टीका-प्रटीकानां च प्रकाशनाय।
3. **गौरवग्रन्थमाला** – प्राच्य-प्रतीच्यानाम् उच्चकोटिकवैचारिक-ग्रन्थानां संस्कृतानुवादप्रकाशनाय।

## प्रबन्धमण्डलस्य उपवेशनम्

**संस्थानमुख्यालये 24-11-2008 दिनाङ्के प्रबन्धमण्डलस्य अष्टादशम् उपवेशनं सम्पन्नम्। तत्र पारिताः विषयाः/कृताः नूतननिर्णयाः इमे–**

- **शोधमण्डलस्य सङ्घटनमनुमोदितम्।**
- **विद्यापरिषदः घटनमनुमोदितम्।**
- **योजनाविनियोजनसमितेः (Planning & Monitering Commeettee) घटनमनुमोदितम्।**
- **गुरुवायूरुपरिसरस्य शताब्दसमारोहः सङ्कल्पितः।**
- **विभागाध्यक्षाः नामिताः।**

## परीक्षामण्डलं घटितमभूत्

राष्ट्रियसंस्कृतसंस्थानेन स्वीकृताधिनियमम् आश्रित्य परीक्षामण्डलमेकं घटितमभवत्। कुलपतिमहोदयस्याध्यक्ष्ये सङ्घटितस्य अस्य मण्डलस्य इमे सदस्याः भवन्ति-राष्ट्रिय-संस्कृतसंस्थानस्य कुलसचिवः, सम्पूर्णानन्दसंस्कृतविश्व-विद्यालयस्य परीक्षानियन्त्रकः / विश्वविद्यालयप्रतिनिधिः, डा० किशोरचन्द्रमहापात्रः (जगन्नाथसंस्कृतविश्वविद्यालयः पुरी), डा० सुब्रह्मण्यशर्मा (रा.सं.सं., गुरुवायूरुपरिसरः), आचार्य-वासुदेवशर्मा (रा.सं.सं. जयपुरपरिसरः), श्री एस्.वि.रमणमूर्तिः (सदाशिवपरिसरः पुरी), डा० लक्ष्मीनिवासपाण्डेयः (रा.सं.सं. लखनऊपरिसरः), डा.यशपालखजूरिया (रा.सं.सं.रणवीरपरिसरः जम्मू), परीक्षानियन्त्रकः (सी.बी.एस्.ई. देहली) अथवा तत्प्रतिनिधिः, परीक्षानियन्त्रकः (दिल्ली वि.वि.) तत्प्रतिनिधिर्वा, परीक्षानियन्त्रकः (श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्या-पीठम्) तत्प्रतिनिधिर्वा, राष्ट्रियसंस्कृतसंस्थानस्य वरिष्ठप्राचार्यः च। संस्थानस्य उपकुलसचिवः (परीक्षा) अस्य मण्डलस्य सदस्यसचिवो भवति। परीक्षामण्डलमिदं 11.9.08 दिनाङ्कात् आरभ्य वर्षद्वयं यावत् वैधं स्थास्यति।

## भाषामन्दाकिन्यां संस्कृतकार्यक्रमाः

राष्ट्रियसंस्कृतसंस्थानेन संस्कृतभाषाशिक्षणस्य, विविध-सन्दर्भेषु आयोजितकविसम्मेलनादिविशिष्टकार्यक्रमाणां, कौमुदी-महोत्सवादि-सांस्कृतिककार्यक्रमाणां च सशब्दचित्रीकरणं कृतमस्ति। एते कार्यक्रमाः विभिन्नभागेषु क्रमशः इ.गा.रा.मु.वि.वि. (IGNOU) द्वारा ज्ञानदर्शनवाहिन्यां (Gyan Darshan 1) प्रसार्यन्ते। तत्र जनवरी-मासे, संक्षेपरामायणमाधारीकृत्य चित्रितस्य भाषाशिक्षणकार्यक्रमस्य 31 भागाः क्रमशः प्रतिदिनं प्रातः 6:30 तः 7:00 यावत् प्रसारिताः भविष्यन्ति।

प्रतिदिनं (रविवासरं विहाय) प्रातः 7:15 तः 7:45 पर्यन्तं ज्योतिर्विज्ञानसम्बद्धकार्यक्रमस्य चित्रितभागाः क्रमशः प्रसार्यन्ते। रविवासरे तु तस्मिन् समये संस्कृतरूपकाणां चित्रितभागाः प्रदर्श्यन्ते।

# प्रवृत्तः कौमुदीमहोत्सवः

राष्ट्रियसंस्कृतसंस्थानेन समायोजिता वार्षिकी अन्तःपरिसरीया त्रिदिवसीयसंस्कृतनाट्यस्पर्धा राजधान्याः एल्.टी.जी. प्रेक्षागृहे भव्यतया सम्पन्नतां गता। 'कौमुदीमहोत्सवः' इति नाम्ना प्रथितोऽयं सङ्कल्पः अस्मिन् वर्षे नवम्बरमासस्य चतुर्विंशतिदिनाङ्कात् षड्विंशतिदिनाङ्कपर्यन्तं सहृदयसामाजिकैः दृष्टिसात्कृतः।

कौमुदीमहोत्सवस्य शुभारम्भः 'वन्दे मातरम्' इति स्वागतनृत्येन कृतः यस्य प्रस्तुतिः गुरुवायूरुपरिसरीयच्छात्रैः सम्पादिता। तदनु संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठिमहोदयः मञ्चस्थेभ्यः विद्वद्भ्यः स्वागतं व्याहरत्। मञ्चस्थाः विद्वांसः आसन् आचार्य-श्रीनिवासरथः, (उपाध्यक्षः, महर्षिसान्दीपनिराष्ट्रियवेदविद्या-प्रतिष्ठानम्), डा० श्रीमती सरोजिनीमहिषी, (उपाध्यक्षचरा, राष्ट्रियसंस्कृतसंस्थानम्), आचार्यः कमलेशदत्तत्रिपाठी, (परामर्शदाता, इन्दिरागान्धीराष्ट्रियकलाकेन्द्रम्), आचार्यः अभिराजराजेन्द्रमिश्रः, आचार्यः हर्षदेवमाधवः, आचार्यः बलदेवमेहरा, आचार्यः गङ्गाधरपण्डा च। तत्पश्चात् क्रमशः मुख्यातिथिना, विशिष्टातिथिना सारस्वतातिथिना च भाषणेन सामाजिकाः उद्बोधिताः।




**कौमुदीमहोत्सवस्य उद्घाटनावसरे – हर्षदेवमाधवः, गङ्गाधरपण्डा, कमलेशदत्तत्रिपाठी, राधावल्लभत्रिपाठी, सरोजिनी महिषी, श्रीनिवासरथः, बलदेवमेहरा, राजेन्द्रमिश्रः**

रसनिष्पत्तिविषयकं रससूत्रं प्रतिपादयन्त्या मुख्यातिथिपदमलङ्कुर्वत्या डा० सरोजिनी-महिषी-महोदयया नाट्यमाहात्म्यं प्रकाशितम्। क्रमेऽस्मिन् सा संस्कृतसाहित्यस्य बहूनि उद्धरणानि श्रावितवती। विशिष्टातिथिः आचार्य-श्रीनिवासरथः स्वीये संक्षिप्तभाषणे सर्वान् सर्वांश्चाभिनन्दयन् संस्कृतभाषायाः माहात्म्यं प्राकटयत्। सारस्वतातिथिनाऽऽचार्य-कमलेशदत्तत्रिपाठिना एकस्य सार्वभौमिक-नाट्यस्य (Universal Drama) परिकल्पना कृता। संस्थानकुलपतिना आचार्य-राधावल्लभत्रिपाठि-महोदयेन स्वीयायां समालोचनात्मिकायां शैल्यां कौमुदीमहोत्सवे त्रिदिवसीयान्तःपरिसरीय-संस्कृतनाट्यस्पर्धायोजनस्य महत्त्वं प्रतिपाद्य संस्कृतनाट्यस्य लक्ष्यं प्रयोजनञ्च गभीरतया परिचर्चितं। सत्रस्यावसाने डा० प्रकाशपाण्डेयः उपकुलसचिवः, शोधविभागः सर्वेभ्यः धन्यवादं प्राकटयत्।

कार्यक्रमस्य मध्ये एव भोपालपरिसरस्य विपिनखिन्नरिया नामकच्छात्राय श्रद्धाञ्जलिः समर्पिता। नटनकुशलः सः अस्मिन्नेव वर्षे हृदयावरोधात् दिवङ्गतः आसीत्।

परम्परानुसारं त्रिदिवसीयनाट्यस्पर्धायाः आरम्भः परिसरीयच्छात्रैः सम्भूय पूर्वरङ्गेन कृतः। अस्मिन् क्रमे जर्जरस्थापनस्य भव्यनिदर्शनमेकं प्रदर्शितम्।

प्रथमदिवसे नाटकत्रयं प्रस्तुतम्। आदौ गङ्गानाथझापरिसरेण गौरीदिगम्बरप्रहसनं प्रस्तुतम्। ततः भोपालपरिसरच्छात्रैः भवभूतिविरचितस्योत्तररामचरितस्य तृतीयाङ्कमाश्रित्य 'सीताच्छायम्' प्रस्तुतम्। रूपकस्य नायिकायाः सीतायाः भावप्रवणाभिनयेन समस्तं हि प्रेक्षागृहं चित्रस्थं परिणतमभूत्।

अन्ते, 'नीपारङ्गमण्डली लखनऊ' इत्यस्यामन्त्रिता प्रस्तुतिः 'भगवदज्जुकीयम्' प्रदर्शितम्। नाट्यप्रस्तुतिरियं स्पर्धायां सम्मिलिता नैवासीत्।

द्वितीयदिवसस्य कार्यक्रमस्यारम्भः शृङ्गेरीपरिसरस्य छात्रायाः सुश्रियः अश्विनीत्यस्याः भरतनाट्यमिति नृत्येन सञ्जातः। तदनन्तरं जयपुरपरिसरेण भासविरचितं प्रतिज्ञायौगन्धरायणं प्रस्तुतम्। अनन्तरं च गरलीपरिसरेण श्रीहर्षस्य नाटिका रत्नावलीति प्रदर्शिता। तदनु नवीनशैलीमाश्रित्य मुम्बई-परिसरेण राष्ट्रं रक्षति रक्षितमित्याधुनिकनाटकस्य रोमाञ्चकारिप्रदर्शनं प्रस्तुतम्।

भोजनानन्तरं पुनः कार्यक्रमोऽयं समारब्धः। सत्रस्यास्य प्रथमं रूपकमासीत् लखनऊ-परिसरस्य विवाहविडम्बनमिति। हास्य-व्यङ्ग्यादिभिः परिपूरितस्यास्य रूपकस्यानन्दः सर्वैरात्मसात्कृतः। तदनन्तरं साक्षात्कृता एका विस्मयकारिणी नाटिका पञ्चकल्याणी इति। गुरुवायूरुपरिसरीयच्छात्रैरभिनीता नाटिका पञ्चकल्याणी। सूत्रबद्धसंवादसंवलितां, नाट्याभिनयस्य सर्वविधाभिः समन्वितां, प्रतिपात्रं च सहभागिताभिवृद्धां नाट्यप्रस्तुतिमिमां साक्षात्कृत्य सामाजिकेषु भावनेयं दृढा जाता यत् श्रेष्ठपारितोषिकमवाप्तुं नाटिकेयं सर्वथा क्षमा इति।

पञ्चकल्याणीप्रवाहे सामाजिकाः उन्मज्जमानाः एवासन्। तावता एव समारब्धेन ऊर्जोत्साहमयेन भावनृत्येन यक्षगानेन ते सामाजिकाः तत्तत्स्थले एव दार्ढ्येन निबद्धाः। यक्षगानशैल्यामेकपात्राभिनयोऽयं प्रस्तुतः श्री वेङ्कटेशमूर्तिना। विगतवर्षद्वयाद् यक्षगानमिदं कौमुदीमहोत्सवस्य प्रमुखमाकर्षणमस्ति।

कौमुदीमहोत्सवस्य तृतीये दिवसे आदौ 'सावित्रीचरितम्' इत्यस्य रूपकस्य प्रस्तुतिः सम्पादिता जम्मूस्थ-रणवीरपरिसरस्य छात्रैः। तदनु पुरीस्थ-सदाशिवपरिसरेण उत्तररामचरितम् प्रदर्शितम्।

भोजनानन्तरं शृङ्गेरीस्थराजीवगान्धीपरिसरस्य छात्रैः आश्चर्यचूडामणिनाटकं प्रदर्शितम्। विगते वर्षे अयमेव परिसरः प्रतिस्पर्धायां प्रथमस्थानभाक् आसीत्। अतः सामाजिकाः समधिकाः आशान्विताः आसन्। तैः निराशाऽपि नैव अवाप्ता। न कदापि प्रतिनायकेन रावणेन जनाः नन्दिताः। परमाश्चर्यचूडामणेः रावणस्यानुकर्त्रा सर्वे द्रष्टारः अभिनयप्रतिभायाः प्रशंसकपदे प्रतिष्ठापिताः।

अस्य महोत्सवस्यान्तिमा नाट्यप्रस्तुतिरासीत् उज्जयिन्याः कालिदास-संस्कृत-अकादम्याः। तैः प्रदर्शितं मालविकाग्निमित्रम् श्रेष्ठाभिनयस्य एकम् उत्तमम् उदाहरणम्। नाट्यमिदं प्रतिस्पर्धायां नैव समाविष्टम् आसीत्।

नाट्यस्पर्धायाः अनन्तरं भव्यसमापनसमारोहः सम्पन्नतां गतः। प्रमुखनिर्णायकेषु अन्यतमाः विदुषुवरेः अभिराजराजेन्द्रमिश्रः महेशभाई-चम्पकभाई-शाहः, आचार्यः रामरत्नः च नाट्याभिमञ्चनस्य विविधान् पक्षान् प्रकाशयन्तः नटानां निर्देशकानाञ्च कृते मार्गदर्शनं कृतवन्तः। अध्यक्षपदाद् भाषमाणः कुलपतिः आचार्यः राधावल्लभत्रिपाठिमहाभागः संस्थानस्यागामियोजनाः सूत्ररूपेण प्राकटयत्। तेन नाट्यसम्बन्धिराष्ट्रिय-संस्कृतकार्यशालाविषये स्वीयेच्छा प्रकाशिता। तेन इदमपि सूचितं यत् देहल्यां संस्थानस्य परिसरस्य उद्घाटनार्थं प्रयत्नः क्रियते। प्रस्तावोऽयं सर्वैः करतलध्वनिना अनुमोदितः। तत्पश्चात् विशिष्टातिथिः आचार्यः रामकरणशर्ममहाभागः स्वीये भाषणे सर्वशास्त्रैः समं समन्वयस्थापनार्थं छात्रान् अभिनन्दितवान्। संस्थानेन साकं स्वीयं साहचर्यं उद्धरता मुख्यातिथिना श्री पी.के. धुंगानेन संस्कृतभाषायाः पारम्परिकगुणगानं प्रवर्तितम्। असौ संस्कृतसंस्थानस्य कस्मिंश्चिदपि कार्यक्रमे पञ्चविंशतिवर्षानन्तरं भागं गृहीतवान् आसीत्। तस्य विशिष्टो निर्देशः आसीत् यत् संस्कृतभाषायाः प्रसाराय दूरदर्शनादिमाध्यमस्यापि उपयोगः करणीयः। अन्ते च, त्रिदिवसीयप्रतिस्पर्धायाः निर्णयाः उद्घोषिताः। तद्यथा–

### प्रत्येकस्मिन् रूपके प्रथमादिपुरस्कारभाजः

| रूपकम् | | पुरस्कारः | – | छात्रनाम | पात्रनाम |
|---|---|---|---|---|---|
| गौरीदिगम्बरप्रहसनम् | – | प्रथमः | - | कौशलेन्द्रत्रिपाठी | मैनाकः |
| | | द्वितीयः | - | शान्तनु षीसेनः | नारदः |
| | | तृतीयः | - | दयाशङ्करत्रिपाठी | नन्दी |
| सीताचरणम् | – | प्रथमः | - | रजनीशर्मा | सीता |
| | | द्वितीयः | - | मयङ्कमिश्रः | रामः |
| | | तृतीयः | - | अनुपमगर्गः | सूत्रधारः |
| प्रतिज्ञायौगन्धरायणम् | – | प्रथमः | - | दीपकभास्करः | यौगन्धरायणः |
| | | द्वितीयः | - | नारायण प्र० उपाध्यायः | विदूषकः |
| | | तृतीयः | - | संदीपकुमारशर्मा | सालकः |
| रत्नावली | – | प्रथमः | - | रजनीशभास्करः | उदयनः |
| | | द्वितीया | - | राशिशर्मा | सागरिका |
| | | तृतीया | - | ज्योति पटियाल | सुसंगता |
| राष्ट्रं रक्षति रक्षितम् | – | प्रथमः | - | नीलेशपाण्ड्या | कालिन्दीरः |
| | | द्वितीयः | - | प्रवीणमिश्रः | मण्डलाधिकारी |
| | | तृतीया | - | शिल्पी रस्तोगी | भासमाना |
| लिखाक्षिविडम्बनम् | – | प्रथमः | - | वेदप्रकाश-उपाध्यायः | रविकान्तः |
| | | द्वितीयः | - | भूपेन्द्रमिश्रः | भृत्यः |
| | | तृतीयः | - | लक्ष्मीकान्तपाठकः | कञ्चुकः |
| पञ्चकल्याणी | – | प्रथमः | - | बिपिन् पी. | इन्द्रः |
| | | द्वितीया | - | निधि पी. के. | अहल्या |
| | | तृतीयः | - | टान् मार्टिन् | शिल्पी |
| सावित्रीचरितम् | – | प्रथमा | - | संतोषकुमारी | सावित्री |
| | | द्वितीयः | - | नरेन्द्रभारतीयः | अश्वपतिः |
| | | तृतीयः | - | विनयकजूरिया | अमात्यः |
| उत्तररामचरितम् | – | प्रथमा | - | ज्ञानज्योतिमहान्ति | सीता |
| | | द्वितीयः | - | रुद्रनारायणरथः | लवः |
| | | तृतीयः | - | धीरेन्द्रपाढी | चन्द्रकेतुः |
| आश्चर्यचूडामणिः | – | प्रथमः | - | रवीशः हेगडे | रावणः |
| | | द्वितीया | - | सौम्या एस्. हेगडे | सीता |
| | | तृतीयः | - | विनायकः एस्. भट्टः | जटायुः |







नाटकानां कानिचन दृश्यानि

## सर्वरूपकेषु प्रथमादिस्थानेन पुरस्कृतानि

### सर्वप्रथमं रूपकम् - पञ्चकल्याणी



गुरुवायूरुपरिसरस्य प्रस्तुतिः

### सर्वद्वितीयं रूपकम् - आश्चर्यचूडामणिः



शृङ्गेरीपरिसरस्य प्रस्तुतिः

### सर्वतृतीयं रूपकम् - सीताच्छायम्



भोपालपरिसरस्य प्रस्तुतिः



### सर्वश्रेष्ठा अभिनेत्री

मध्यप्रदेशस्य सीहोरवास्तव्ययोः श्री राजेन्द्रप्रसादनिर्मलाशर्मदम्पत्योः पुत्री **कुमारी रागिनीशर्मा** भोपालपरिसरे प्राक्शास्त्रि-प्रथमवर्षे अधीयाना वर्तते। संस्कृताध्ययने श्रद्धावती एषा अभिनयादिकलासु विशिष्टम् अभिरुचिं धरति। ऐषमः कौमुदी महोत्सवे सीताच्छायाम् इति नाटके सीतापात्रमभिनीय सर्वोत्कृष्य अभिनेत्री इति पुरस्कार-भाजनमभूत्।



### सर्वश्रेष्ठः अभिनेता

अद्वैतवेदान्तशास्त्रम् अधीयानः आचार्यप्रथमवर्षीयः **श्रीरवीशहेगडे** कर्नाटकेषु सिद्दापुरोपमण्डले जातः श्रीत्रिवेणी-परमेश्वरदम्पत्योः सुपुत्रः बाल्यादेव अध्ययने विविधकलासु च पटुरासीत्। प्राक्शास्त्रि-कक्षातः शृङ्गेरी-परिसरे अधीते। कर्णाटकस्य जानपदकला-प्रभेदेषु, यक्षगानसम्प्रदाये शास्त्राध्ययने च निरतं अभिनिविष्टः एषः प्रतिवर्षं परिसरे, कौमुदीमहोत्सवे च नाटके प्रमुखभूमिकां निर्वाह्य परिसरप्रतिष्ठां संवर्धयति। एषः ऐषमः कौमुदीमहोत्सवे आश्चर्यचूडामणि-नाटके रावणपात्राभिनयार्थं सर्वश्रेष्ठाभि-नेतृत्वेन सम्मानितः।

विशिष्टसम्मानः

कु. वेङ्कटेशमूर्तिः (यक्षगानशैल्या कंसाभिनयनिमित्तम्)

निःसन्दिग्धमिदं यत् समारोहस्यास्य साफल्यं बहूनां साहाय्यं विना असम्भवम्, कार्यक्रमसाफल्याय प्रयतितवन्तः सर्वपरिसराचार्याः, नाट्यकनिर्देशकाः परिसरीयाध्यापकाः, शुक्लामुखर्जी महोदया, मञ्चसञ्चालनकार्यं कृतवान् रत्नमोहन झा अन्ये सहयोगिनः संस्थानपरिवारसदस्याः सर्वे कुलपतिवर्येण अभिनन्दिताः।

एवमागामिवर्षे पुनर्मिलनकामनया षष्ठः कौमुदीमहोत्सवोऽयं सुचारुतया सम्पन्नतां गतः।

## नूतनप्रकाशनानि

कौमुदीमहोत्सवस्य उद्घाटनसत्रे त्रयः सद्यः प्रकाशिताः ग्रन्थाः लोकार्पिताः। ते च ग्रन्थाः -

(1) आचार्य-अभिराजराजेन्द्रमिश्रविरचितं 'कौमारम्' इति शिशुगीतसङ्कलनात्मकं पुस्तकम्

(2) डा. हर्षदेवमाधवविरचितं 'मूको रामगिरिर्भूत्वा' इति उपन्यासात्मकं पुस्तकं संस्थानेन प्रकाशितम्

(3) रामानुजताताचार्यविरचिता शाब्दबोधमीमांसा (चतुर्थो भागः)

## भाविप्रकाशनानि

प्रो. पुष्पादीक्षितकृत-तद्धितकोषः कृदन्तकोषः च।

प्रो. राधावल्लभत्रिपाठिविरचितस्य 'संस्कृतसाहित्य को इस्लामपरम्परा का योगदान' इति पुस्तकस्य परिवर्धितसंस्करणम्।

प्रो. राधाकुमुदमुखोपाध्यायविरचितस्य Education System in Ancient India इति ग्रन्थस्य संस्कृतानुवादः।

मम. गङ्गाधरशास्त्रिविरचितस्य अलिविलासिसंलापः इति ग्रन्थस्य सानुवादं पुनरीक्षितसंस्करणम्।

# कुलपतेः दैनन्दिनी

2.10.08 गरलीपरिसरस्य, गरलीपरिसरेण प्राप्तस्य नूतनभूखण्डस्य च निरीक्षणम्।

13.10.08 लखनऊ परिसरे प्रवृत्तायाः म.म. गोपीनाथकविराजस्मृतिव्याख्यानमालायाः आध्यक्ष्यम्।

14.10.08 लखनऊ नगरे उत्तरप्रदेशसंस्कृतसंस्थानेन आयोजिते महर्षिवाल्मीकिजयन्त्युत्सवे विशिष्टभाषणम्।

15.10.08 संस्थानमुख्यालये संस्थानस्य स्थापनादिवसकार्यक्रमस्य आध्यक्ष्यम्। संस्थानमुख्यालये अनुदानसमितेः उपवेशने भागग्रहणं च।

16.10.08 गुरुवायूरपरिसरे पाण्डुलिपिसङ्ग्रहणाभियानस्य समुद्घाटनम्।

17.10.08 केरलेषु श्रीशङ्कराचार्यविश्वविद्यालयेन आयोजितकार्यक्रमे 'संस्कृते शोधस्य, शोधप्रविधेः च साम्प्रतिकपद्धतयः' इति विषये विशिष्टभाषणम्। एरणाकुले (केरलेषु) चिन्मय-इण्टरनेशनल् फाउण्डेशन्-शोधसंस्थानम् इत्यस्य उद्घाटनम्, तत्र राष्ट्रियसङ्गोष्ठ्यां भागग्रहणं च।

20.10.08 केन्द्रीयहिन्दीसंस्थाने कार्यशालायां विशिष्टोपस्थितिः।

21.10.08 संस्थाने प्रवृत्ते ए.सी.पी.-विषयकसमावेशे, आदर्शसंस्कृतमहाविद्यालयानां अनुदानवर्धनविषये विचारार्थं संस्थाने आयोजितसमावेशे च आध्यक्ष्यम्।

22.10.08 इलाहाबादे गङ्गानाथझापरिसरेण प्रवर्त्यमानानां विविधशोधपरियोजनानां समीक्षा।



शृङ्गेरीपरिसरस्य वार्षिकोत्सवावसरे सद्गुरवः श्रीश्रीभारतीतीर्थस्वामिचरणाः कुलपतिवर्यम् आशीर्भिः अनुगृह्णन्

1.11.08 हैदराबादे उस्मानियाविश्वविद्यालयस्थितायाः संस्कृतपरिषदः सन्दर्शनम्।

2.11.08 बेङ्गलूरुनगरे C-DAC इत्यत्र संस्थानसहयोगेन सम्पाद्यमानपरियोजनया सम्बद्धोपवेशने विशिष्टोपस्थितिः।

3.11.08 नवदेहल्यां साहित्य-अकादम्या आयोजिते जयदेवोत्सवे गीतगोविन्दविषये शोधपत्रप्रस्तुतिः।

4.11.08 रा.शै.अ.एवं प्र.परिषदः (NCERT) विभागीयपरामर्शसमितेः पञ्चमोपवेशने उपस्थितिः।

5.11.08 संस्थानस्य मुख्यालये प्रवृत्ते शोधमण्डलस्योपवेशने आध्यक्ष्यम्।

7.11.08 जयपुरपरिसरे आयोजिते पण्डितमधुसूदनओझास्मृतिव्याख्यानमालाकार्यक्रमे आध्यक्ष्यम्।

8.11.08 नवदेहल्यां टागोरगार्डन्-स्थित-केन्द्रीयविद्यालयस्य कार्यपरिषदः समावेशे अध्यक्षत्वेन भागग्रहणम्।

13.11.08 उज्जयिन्यां कालिदास-संस्कृत-अकादम्या आयोजिते अखिलभारतीयकालिदाससमारोहे 'कालिदाससाहित्यसन्दर्भे मानव-प्रकृत्योरन्तःसम्बन्धः' इति विषये व्याख्यानम्।

20.11.08 सीताराम-आदर्शसंस्कृतमहाविद्यालयस्य चयनसमितेः आध्यक्ष्यम्।

22.11.08 नवदेहल्यां मन्दाकिनीसंस्कृतपरिषदा समायोजितकार्यक्रमे विशिष्टातिथित्वेनोपस्थितिः।

24 तः 26.11.08 नवदेहल्यां दिनत्रयात्मकस्य संस्कृतकौमुदीमहोत्सवस्य आयोजनम्। संस्थानस्य वित्तसमितेः, प्रबन्धमण्डलस्य च उपवेशने आध्यक्ष्यम्।

29.11.08 पुणे-नगरे एशियभारतीशोधसंस्थया 'वैश्विकपरिप्रेक्ष्ये रामायणविषयकमध्ययनम्' इति विषये आयोजिते अन्ताराष्ट्रियसम्मेलने भागग्रहणम्।

1.12.08 सागरविश्वविद्यालये संस्थानेन प्रायोजितायां शोधप्रविधिपाण्डुलिपिविज्ञानविषययोः कार्यशालायाः उद्घाटनसमारोहे मुख्यातिथित्वेन उद्बोधनम्।

4.12.08 सङ्गीतनाटक-अकादम्या कर्णाटके धारवाडनगरे आयोजितस्य नाट्यपर्व-कार्यक्रमस्य उद्घाटनभाषणम्, तदङ्गतया आयोजितायाम् 'आङ्गिकम्-शास्त्रम्' इति विषयकगोष्ठ्यां शोधपत्रप्रस्तुतिः च।

5 तः 6.12.08 भगोला-आदर्शसंस्कृतमहाविद्यालयसम्बद्ध-चयनसमितेः आध्यक्ष्यम्।

11.12.08 भोपालपरिसरस्य वार्षिकोत्सवे मुख्यातिथित्वम्। भोपालपरिसरस्य नूतनभवननिर्माणसन्दर्भे केन्द्रीय-लोकनिर्माणविभागस्य मुख्याभियन्त्रा सह विचारविनिमयः।

13.12.08 वाराणस्याम् उत्तरप्रदेश-संस्कृत-संस्थानेन आयोजिते अखिलभारतीयव्यासमहोत्सवे मुख्यातिथित्वेनोपस्थितिः।

17.12.08 संस्थानस्य शृङ्गेरीपरिसरस्य वार्षिकोत्सवे आध्यक्ष्यम्।

21.12.08 कोलकातायां वैदिकसम्मेलने 'ऋग्वेदे साहित्यिक-सिद्धान्तः' इति विषये व्याख्यानम्।

22 तः 25.11.08 पुर्यां सदाशिवपरिसरे अन्तःपरिसरीययुवसमारोहे, अखिलभारतशास्त्रीय- संस्कृतभाषणस्पर्धायोजने च आध्यक्ष्यम्।



संस्कृते अनूदितस्य गीताञ्जलेः लोकार्पणदृश्यम्
वामतः सुब्रह्मण्यः, वी.एन.झाः, राधावल्लभत्रिपाठी, स्वामी तेजोमयानन्दः, श्रीरामवारियर्, मुरलीमाधवन्, श्रीनिवासरथः

## नूतनम् आदर्शशोधसंस्थानम् उद्घाटितम्

केरलराज्ये वेलियनाट्-नगरस्थिते आदिशङ्करनिलये **चिन्मय-इण्टरनाशनल्-फौण्डेशन्-शोधसंस्थानम्** अक्टोबरमासस्य 17 दिनाङ्के पूर्वाह्णे उद्घाटितमभूत्। चिन्मयमिशन् इत्यस्य अध्यक्षस्य पूज्यस्वामिनः श्रीतेजोमयानन्दमहोदयस्य दिव्योपस्थितौ, डा.पी.सी.मुरलीमाधवन्-महोदयस्य आध्यक्ष्ये च प्रवृत्ते उद्घाटनसमारोहे संस्थानकुलपतिः आचार्यः राधावल्लभ-त्रिपाठिमहोदयः चिन्मय-इण्टरनेशनल्-फौण्डेशन् शोधसंस्थानं संस्थानस्य आदर्शशोधसंस्थानत्वेन समुदघोषयत्। कार्यक्रमे आदरणीयः आचार्यः श्रीनिवासरथः, आचार्यः वसिष्ठनारायणझाः च विशिष्टातिथिपदं व्यभूषयताम्। समारोहेऽस्मिन् पूज्यस्वामिनः अनुग्रहभाषणम्, अध्यक्षभाषणम्, पण्डितसमादरणम्- इत्येतदनन्तरं, शोधसंस्थानेन सज्जीकृतस्य 'गीताञ्जलिः' इति संस्कृते अनूदितग्रन्थस्य लोकार्पणं संस्थानकुलपतिना त्रिपाठिमहोदयेन कृतम्। उद्घाटनसभासमनन्तरमेव कविसम्मेलनं प्रवृत्तं यत्र कविसार्वभौमस्य श्रीनिवासरथमहोदयस्य, श्री के. रामकृष्णवारियर्-महोदयस्य च विशिष्टोपस्थितिरासीत्। तस्मिन्नेव दिने अपराह्णे सम्पन्नायां विचारगोष्ठ्यां स्वामिपादः श्री अद्वयानन्दः अध्यक्षपदमलमकरोत्। मुख्यवक्तृत्वेन आचार्यः वी.एन्.झामहोदयः उपस्थाय गोष्ठीं सफलीकृतवान्। वाराणसेयः आचार्यः गङ्गाधरपण्डा 'भारतीयसंस्कृतिं प्रति पूज्यस्वामिनः चिन्मयानन्दस्य योगदानम्' इति विषये उपन्यस्तवान्। आन्ध्रप्रदेशात् समागता डा. पी. गीर्वाणी 'वेदान्तदर्शनं प्रति पूज्यस्वामिनः चिन्मयानन्दस्य योगदानम्' इति विषयमधिकृत्य निबन्धमुपस्थापितवती। शान्तिपाठेन सभा सम्पन्नतामगात्।

## 143 वर्षप्राचीनः सदाशिवपरिसरः



परिसरे प्रतिष्ठापितः श्रीमतः सदाशिवमिश्रस्य विग्रहः

साम्प्रतं मानितविश्वविद्यालयस्य राष्ट्रियसंस्कृतसंस्थानस्य अन्यतमपरिसरत्वेन परिगणितस्य पुरीस्थस्याऽस्य श्रीसदाशिवपरिसरस्य प्राथमिकस्वरूपं कल्पितमासीत् ख्रीष्टीये 1865 तमे वर्षे। पुरीसमीपस्थ-श्रीरामचन्द्रपुर-शासनाख्यग्रामे 1845 तमे ख्रीष्टाब्दे लब्धजन्मा अप्रतिमः संस्कृतविद्वान् हरिहरदाशमहाभागः पुरीनगरे एकस्य संस्कृतविद्यालयस्य प्रतिष्ठापनार्थं बलरामपुरमहाराजं श्री दिग्विजयसिंहबाहादुरं सम्प्रार्थयामास। तत्प्रार्थनामङ्गीकृत्य महाराजेन प्रदत्तेन पञ्चसहस्रमुद्रात्मकाऽर्थिकसाहाय्येन 1865 तमे वर्षे पुरीमण्डलविद्यालये संस्कृतविद्यालयः समुद्घाटितः। स च पण्डित-हरिहरदाशः विद्यालयेऽस्मिन् प्रथमशिक्षकत्वेन अध्यापयामास। समग्रे भारतवर्षे भ्रमित्वा तेनैव बहुग्रन्थाः संगृह्य विद्यालयस्यास्य ग्रन्थागारे संस्थापिताः। अनन्तरञ्च महाराजस्याऽर्थिकसहायतया विद्यार्थिभ्यः छात्रवृत्तिप्रदानाय व्यवस्थाऽपि दाशमहाभागेन कृता।

ख्रीष्टीये 1888 तमे वर्षे विद्यालयोऽयं सर्वकारेण सविधि स्वीकृतः सन् पुरीमण्डलाधीशानाम् आध्यक्ष्ये निर्मितया समित्या परिचालितोऽभूत्। अग्रे च 1-4-1918 तमे दिनाङ्के महामहोपाध्याय-काव्यकण्ठ-श्रीसदाशिवमिश्राणां बहुप्रयासेनाऽयं संस्कृतविद्यालयः 'पुरीसंस्कृतमहाविद्यालय' इति नाम्ना संस्कृतमहाविद्यालयस्वरूपं प्राप्तवान्। तेषां मिश्रपादानाम् अविश्रान्तप्रयासस्य स्वीकृत्यर्थम् उत्कलसर्वकारः 1952 वर्षे तन्नाम्ना महाविद्यालयस्य नाम 'सदाशिव-संस्कृतमहाविद्यालय' इति स्थापयामास। किञ्चाग्रे ख्रीष्टीय 1972 तमे वर्षे अगस्तमासस्य पञ्चदशदिवसे सदाशिवसंस्कृतमहाविद्यालयोऽयं मानवसंसाधनविकासमन्त्रालयाधीनेन दिल्लीस्थराष्ट्रियसंस्कृतसंस्थानेन केन्द्रीयसंस्कृत-विद्यापीठत्वेन समधिगृहीतः। आचार्याः-नीलमणिरथः, लड्डुकेश्वरशतपथी, हरिहरझाः भागवतप्रसादत्रिपाठी, गोपालमहोदयः, केतकीनायकः इत्यादयः अप्रतिमाः विद्वांसः विद्यापीठमेतत् समेधितवन्तः। मानवसंसाधनविकासमन्त्रालयेन राष्ट्रियसंस्कृतसंस्थानं यदा 7-5-2002 तमे दिनाङ्के मानितविश्वविद्यालयत्वेन समुद्घोषितं, 23-6-02 तमे दिवसे विश्वविद्यालयानुदानायोगेन मानितविश्वविद्यालयत्वेन स्वीकृतं, तदाऽऽरभ्य श्रीसदाशिवकेन्द्रीयसंस्कृतविद्यापीठं मानितविश्वविद्यालयस्य राष्ट्रियसंस्कृतसंस्थानस्य दशपरिसरेष्वन्यतमत्वेन 'श्रीसदाशिवपरिसरः' इति नाम्ना परिचितमभूत्।

# आरब्धा शोधप्रविधि-पाण्डुलिपिविज्ञानयोः राष्ट्रिया कार्यशाला

राष्ट्रियसंस्कृतसंस्थानेन प्रायोजिता शोधप्रविधि-पाण्डुलिपिविज्ञानविषयिणी एकविंशतिदिनात्मिका कार्यशाला सागरस्थित-डा. हरिसिंहगौरविश्वविद्यालयस्य संस्कृतविभागेन संयोजिता। देशस्य विभिन्नभागेभ्यः आहत्य 60 अनुसन्धातारः भागग्रहणाय समागताः। मार्गशीर्षशुक्ल-चतुर्थ्याम् (01-12-08) आरब्धायाः अस्याः कार्यशालायाः उद्घाटनोत्सवः सागरविश्वविद्यालयस्य वाङ्गियासभागारे पूर्वाह्णे सम्पन्नः। हरिसिंहगौरविश्वविद्यालयस्य कार्यवाहककुलपतिः आचार्यः के.एस.पित्रे सभायाः आध्यक्ष्यं निरवहत्। कार्यक्रमे सारस्वतातिथित्वेन समुपस्थितः आचार्यः रामकरणशर्ममहोदयः न्यरूपयत् यत् प्राचीनसंस्कृतग्रन्थेषु शास्त्रपरम्परायां सूत्रात्मकवाङ्मयेषु च शोधप्रविधेः अत्युत्तमा सरणिः द्रष्टुं शक्यते। गभीरानुसन्धानस्य निष्कर्षरूपाः आयुर्वेदादिशास्त्रग्रन्थाः उत्कृष्टशोधप्रविधीनां परिणामभूताः इति। संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठिमहोदयः भाषमाणः समभिप्रेतवान् यत् अस्मद्देशस्य विभिन्नस्थानेषु बह्वीषु संस्थासु रक्षितानां पाण्डुलिपिग्रन्थानाम् अनुशीलनेन अस्माकं समृद्धपरम्परायाः वास्तविकः परिचयः भवेत्, कुतूहलकारिणः अज्ञातविषयाश्च ज्ञाताः भवेयुः। चतुर्थ-पञ्चमशताब्द्योः समये पञ्चतन्त्रस्य कथाः पाण्डुलिपिमाध्यमेन विदेशेषु प्रसृताः अभवन्। तेन, जगति कथासाहित्यस्य विशिष्टा परम्परा समारब्धा। यद्यपि लक्षशः भारतीयपाण्डुलिपिग्रन्थाः बहुविधकारणैः लुप्ताः जाताः, विदेशीयानां हस्तगताः वा अभवन् तथापि अद्यत्वे भारते कोटिशः पाण्डुलिपिग्रन्थाः यत्र क्वापि सन्ति तेषां संरक्षणम् अनुसन्धानं प्रकाशनं च भवेत्। शोधच्छात्राः अनुसन्धानकर्मणि कुशलाः सन्तः उच्चकोटिकग्रन्थान् प्रकाशपथम् आनयेयुः। तदर्थम् अपेक्षितं ज्ञानं कौशलं च अस्यां कार्यशालायां सम्पादयेयुः संवर्धयेयुः च इति।

कार्यक्रमारम्भे गौरविश्वविद्यालयस्य संस्कृतविभागाध्यक्षया डा. कुसुमभूरियादत्ता-महोदयया स्वागतवचनपुरस्सरं सर्वेषां परिचयः प्रदत्त आसीत्। कार्यशालासमन्वयकः डा. अच्युतानन्ददाशमहोदयः शोधप्रविधिप्रशिक्षणस्यावश्यकतां सोदाहरणं निरूप्य प्रास्ताविकभाषणमकरोत्। संस्थानपक्षतः समुपस्थितः सहायककुलसचिवः डा. प्रकाशपाण्डेयः सर्वेभ्यः कृतज्ञतां न्यवेदयत्। शोधकर्मणि, पाण्डुलिपिविज्ञाने च विहितश्रमाः आचार्यः राजेन्द्रमिश्रः, आचार्यः अम्बिकादत्तशर्मा, आचार्यः गयाचरणत्रिपाठी, आचार्यः सत्यव्रतशास्त्री, आचार्यः राजेन्द्रनानावटी, आचार्यः अच्युतानन्ददाशः, आचार्यः अनिरुद्धदाशः, आचार्यः आर्.वि. द्विवेदी, आचार्यः गोपबन्धुमिश्रः, आचार्यः टि.एन्.धर्माधिकारी, आचार्य-रत्नाबसु, डा. प्रकाशपाण्डेयः, डा. एस्. दीक्षित्, डा. सोमनाथसरकार्, श्री पि. रामानुजन्, आचार्यः वि.वि. चौबे, डा. सुरेन्द्रमोहनमिश्रः, डा. रुद्रमन्, डा. आर्. मिश्रः, आचार्यः ओ.पी.पाण्डे इत्यादयो विद्वांसः एकविंशतिदिनात्मककार्यशालायां शोधच्छात्राणां मार्गदर्शनं कुर्वन्ति। 21-12-08 दिनाङ्के इयं कार्यशाला सम्पन्नतामेष्यति।

## प्राचार्याणाम् उपवेशनम्

प्रगतिपर्यालोचनं विधातुं परिसरसम्बद्धक्रियाकलापानां समीक्षणाय च संस्थानस्य परिसरप्राचार्याणाम् उपवेशनमेकं 23-11-2008 दिनाङ्के मुख्यालये आयोजितमभूत्। कुलपतेः आध्यक्ष्ये प्रवृत्ते तस्मिन्नुपवेशने स्वीकृतप्रस्तावेषु विशेषतया उल्लेखनीयाः इमे–

- अधोनिर्दिष्ट-सङ्गोष्ठ्यः/व्याख्यानानि तत्तत्परिसरेषु आयोजयिष्यन्ते–
  - शृङ्गेर्यां प्रतिवर्षद्वयं एकवारं 'श्रीभारतीतीर्थशास्त्रार्थसभा', 'रामेश्वरानन्दतीर्थस्मृतिव्याख्यानमाला' च।
  - भोपाले 'संस्कृतवाङ्मये प्रबन्धविज्ञानम्' इति विषये एका सङ्गोष्ठी।
  - शैवशास्त्रविषये जम्मूपरिसरे काचित् सङ्गोष्ठी।
- संस्थानस्य सर्वेषु परिसरेषु स्वस्वपरिसरप्रकाशनेन सह मुख्यालयस्य, इतरपरिसराणां च प्रकाशनानि विक्रयणाय सदा उपलब्धानि स्युः।
- 2008-09 वर्षादारभ्य सङ्गणकशिक्षणसम्बद्धाः परीक्षाङ्काः छात्राणाम् अङ्कपत्रे उल्लिखिताः भवेयुः यद्यपि तेषां (सङ्गणकशिक्षणपरीक्षायाः अङ्कानां) परिगणना श्रेण्यादिनिर्धारणसन्दर्भे नैव भवेत्।
- सर्वपरिसरेषु ग्रन्थालयनिमित्तं पुस्तकक्रयसमितिः प्राचार्यैः घटिता भवेत्।
- शिक्षाशास्त्रिकक्षायाः शुल्कसंवर्धनं सम्प्रति नास्ति। प्रवेशप्रक्रिया यथापूर्वं प्रवर्तेत।
- आन्तरिकगुणवत्ताङ्कीकरणकोषः कश्चन सर्वेण परिसरेण घटनीयः।
- आगामिनि जनवरीमासे राष्ट्रियमूल्याङ्कन-प्रत्यायन-परिषदः (NAAC) निरीक्षकगणः परिसरेषु निरीक्षणं कुर्यादिति सम्भावना वर्तते इत्येतदर्थं सज्जैः भाव्यम्।
- संस्थानस्य परिसरेषु संस्थानकार्यकलापानां संक्षिप्त-परिचयात्मिका, शैक्षिकसत्रस्य वार्षिककार्यविभागप्रदर्शनात्मिका, छात्रसम्बद्धनियम-सूचनादीनां प्रदर्शिका पुस्तिका (hand book) प्रतिवर्षं निर्मातव्या।

## जयपुरपरिसरस्य रजतजयन्तीमहोत्सवः

जयपुरपरिसरस्य रजतजयन्तीमहोत्सवाङ्गतया नैके कार्यक्रमाः सङ्कल्पिताः। तत्रान्यतमा रङ्गमञ्चविषयिणी कार्यशाला 1-11-08 तः 21-11-08 पर्यन्तं जयपुरपरिसरे प्रवृत्ता। तत्र मुख्यवक्तृत्वेन विख्यातनाट्यनिर्देशकः डा. कमलवसिष्ठमहोदयः समाहूतः आसीत्। डा. रमाकान्त-पाण्डेमहोदयेन संयोजितायाम् अस्यां कार्यशालायां ४० छात्राः भागमगृह्णन्। डा. वसिष्ठमहोदयः नाट्यशास्त्रीय-प्रमाणप्रदर्शनपुरस्सरं विविधनाट्यमुद्राणां, चारीप्रभृतिनाट्य-तत्त्वानां च विषये कार्यशालायां छात्रान् उदबोधयत्। कार्यक्रमस्योद्घाटनावसरे भाषमाणः परिसरप्राचार्यः हिन्दकेसरीमहोदयः नाट्यं केवलं मनोरञ्जनसाधनं नास्ति, इदं तु जीवनमूल्यबोधकं चाप्यस्ति इति न्यरूपयत्। कार्यक्रमान्ते डा. सुरेशसिंहः कृतज्ञतां न्यवेदयत्।

रजतजयन्तीमुपलक्ष्य जयपुरपरिसरे आयोजयिष्य-माणाः अन्ये कार्यक्रमाः–

- 10-1-09 तः 12-1-09 पर्यन्तम् आधुनिकसंस्कृत-साहित्यविषये राष्ट्रियसङ्गोष्ठी।
- 12-1-09 तः 01-2-09 पर्यन्तं व्याकरणे कार्यशाला।
- फरवरीमासे वेदान्तविषयिणी कार्यशाला।

## गोपीनाथकविराज-स्मृतिव्याख्यानमाला समारब्धा

राष्ट्रियसंस्कृतसंस्थानेन प्रवर्तिता महामहोपाध्यायश्रीगोपीनाथकविराज-स्मृतिव्याख्यानमाला 14.10.2008 दिनाङ्के मङ्गलवासरे अपराह्णे द्विवादने लखनऊपरिसरस्य सभाकक्षे समारब्धा। राष्ट्रियसंस्कृतसंस्थानस्य कुलपतेः आचार्य-राधावल्लभत्रिपाठिनः आध्यक्ष्ये प्रवृत्तायां सभायामादौ परिसरप्राचार्यः डा. एन्.आर्. कण्णन् महोदयः सर्वेभ्यः स्वागतं व्याहृतवान्। श्रीलालबहादुरशास्त्रि रा.सं. विद्यापीठस्य कुलपतिः आचार्यः वाचस्पति-उपाध्यायः विशिष्टातिथिपदं व्यभूषयत्। विशिष्टवक्ता आचार्यः कमलेशदत्तत्रिपाठिमहोदयः "आगमेषु विश्वदृष्टिः" इति विषयमधिकृत्य व्याख्यानमालायाः प्रथमं व्याख्यानं प्रस्तुतवान्। प्रवर्तमाने नवयुगे आगमविद्याविदां लखनऊ-नगरस्थानां कतिपयविदुषां पुरस्कृतं योगदानमुद्भाव्य वैश्वीकरणसन्दर्भेषु आगमविद्यायाः महत्त्वमुपपादयता वक्त्रा श्रीमतां गोपीनाथकविराजानामागमिकं महदवदानं सम्यक् आविष्कृतम्। आगमिकेनैव पथा प्रवर्तमानासु लौकिकासु प्रवृत्तिषु प्राणसञ्चारः सम्भवतीति श्रोतृभिरपि सम्यगनुभूतम्।



दीपप्रज्वालनपुरस्सरं व्याख्यानमालायाः प्रारम्भं समाचरतः वाचस्पति-उपाध्यायः, राधावल्लभत्रिपाठी च। चित्रे दृश्यते प्राचार्यः एन्.आर्. कण्णन् च।

## आरब्धा म.म. मधुसूदनओझा-स्मृति-व्याख्यानमाला

7-11-08 दिनाङ्के जयपुरपरिसरे म.म. मधुसूदन ओझा-स्मृति-व्याख्यानमाला समारब्धा। व्याख्यानमालायाः प्रथमं व्याख्यानम् 'ऋग्वेदे काव्यतत्त्वानुशीलनम्' इति विषयमधिकृत्य आचार्यः गयाचरणत्रिपाठिमहोदयः (इन्दिरागान्धीराष्ट्रिय- कलाकेन्द्रम्) अकरोत्। तेन विदुषा काव्यचिन्तनपरम्परायाः आरम्भः वेदेषु अवलोकयितुं शक्यते इति सोदाहरणं निरूपितम्। कवीनां कोटयः, काव्यानां कोटयः, काव्यसिद्धान्तः इत्यादिविषयबिन्दूनां विवरण-पुरस्सरं सः स्वीयं मतं पुष्टीकृतवान्। कार्यक्रमस्य अध्यक्षपदम् अलङ्कुर्वता संस्थानकुलपतिना राधावल्लभ-त्रिपाठिवर्येण 'वैदिकवाङ्मये एव काव्यकलाचिन्तन-परम्परायाः मूलं दृश्यत इति प्रतिपाद्य गुणरीत्यलङ्कारादीनां प्रयोगः वेदेषु कथं विद्यत इति विवृतम्। सभायां परिसरप्राचार्येण हिन्दकेसरीमहोदयेन स्वागतभाषणं कृतमासीत्। आचार्यवासुदेवशर्मणा च धन्यवादः प्रकटितः। श्रीमता के.पी. केशवन् महोदयेन संयोजनमकारि।



म.म. मधुसूदन ओझा स्मृतिव्याख्यानमालायाः शुभारम्भं कुर्वन् गयाचरणत्रिपाठी



अध्यक्षभाषणं कुर्वन् कुलपतिः राधावल्लभत्रिपाठी

## लखनऊ-परिसरे

**अनौपचारिकसंस्कृतशिक्षणम्**- 20-11-2008 दिनाङ्के परिसरप्राचार्यस्याध्यक्ष्ये शिक्षाशास्त्र- विभागाध्यक्षस्य संयोजकत्वे अनौपचारिकसंस्कृतशिक्षणस्यारम्भो जातः।

**विशिष्टव्याख्यानमाला**- वार्षिकी विशिष्टव्याख्यानमाला परिसरे 15-12-2008 दिनाङ्कतः प्रारब्धा। प्राचार्यस्याध्यक्ष्ये सम्पूर्णानन्दसंस्कृतविश्व-विद्यालयस्याचार्यः गङ्गाधरपण्डा-महोदयः 'कालिदाससाहित्ये शैक्षणिकतत्त्वानि' इति विषयमधिकृत्य शिक्षाशास्त्रविषयकं प्रथमं व्याख्यानं प्रदत्तवान्।

परिसरवार्ताः

## संस्थानविदुषामुपलब्धयः

- अक्टोबरमासस्य सप्तमाष्टमदिनाङ्कयोः त्रिशूरस्थ-ब्रह्मस्वमठेनायोजितायां शास्त्रसभायां डा. इ.एस्. राजन् (शृङ्गेरी), डा. इ.पी. श्रीदेवी (शृङ्गेरी) च शास्त्रार्थप्रस्तुतिं अकुरुताम्।
- डा. पी. महाबलेश्वरभट्टः (शृङ्गेरी) मङ्गलूरुनगरे कॅनरामहाविद्यालयेन 17-11-08 तः 19-11-08 पर्यन्तमायोजिते 'आनन्दमीमांसा' इति विश्वविद्यालयानुदानायोगेन (UGC) प्रायोजितायां राष्ट्रियसङ्गोष्ठ्यां शोधपत्रं प्रस्तुतवान्।
- डा. हनीफखानशास्त्री (मुख्यालयः) 6-12-08 तः 8-12-08 पर्यन्तं 'विश्वबन्धुत्वं गीता च' इति विषये कुरुक्षेत्रे सम्पन्नायाम् अन्ताराष्ट्रियगोष्ठ्यां श्रीमद्भगवद्गीतायाः सार्वजनीनोपयोगिता विषये व्याख्यानमकरोत्।
- रा.सं. संस्थानस्य मुख्यालये शोधसहायकत्वेन कार्यं कुर्वाणः श्री कुल्लपल्लि महेन्द्रः स्वर्णपदकम् अलभत। तस्मै स्वर्णपदकमिदम् एम.ए. संस्कृतकक्षायाम् सर्वाधिकाङ्कप्राप्तिमुपलक्ष्य हैदराबादस्थ-उस्मानियाविश्वविद्यालयेन स्वीयसभागारे अनतिपूर्वम् आयोजिते विशिष्टसमारोहे प्रदत्तम्।

## गुरुवायूर-परिसरे पाण्डुलिपिसङ्ग्रहणाभियानम् आरब्धम्

आश्वयुजबहुलद्वितीयायां गुरुवासरे (16-10-08 दिनाङ्के) पूर्वाह्णे संस्थानस्य गुरुवायूरुपरिसरे पाण्डुलिपिसङ्ग्रहणाभियानस्य शुभारम्भो जातः। संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठिवर्यः अभियानस्य शुभारम्भमुद्घोष्य भारतस्य विभिन्नकोणेषु, गृहेषु, मठमन्दिरेषु च ज्ञाताज्ञातस्थितिषु विद्यमानानां पाण्डुलिपिग्रन्थानां महत्त्वं, तेषां संरक्षणस्य अनिवार्यताम् आवश्यकतां च न्यरूपयत्। प्रसङ्गेऽस्मिन् प्रथितयशसः कवितल्लजस्य श्रीनिवासरथमहाभागस्य मार्गदर्शनवचनानि परिसरपरिवारेण प्राप्तः। रथमहाभागः, केरलकलामण्डलस्य कुलपतिः के.जि. पौलोसुवर्यः च गुरुवायूरुपरिसरेण संस्थानपक्षतः सम्मानितौ अभूताम्। परिसरप्राचार्यस्य के.टी.माधवन्महोदयस्य अध्यक्षतायां प्रवृत्तेऽस्मिन् कार्यक्रमे सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य पुराणेतिहासविभागस्य आचार्यः गङ्गाधरपण्डा-महोदयः प्रधानाभिभाषणम् अकरोत्।



सामाजिकैः समर्पितं पाण्डुलिपिग्रन्थं स्वीकुर्वन् कुलपतिः। चित्रे दृश्यन्ते सुब्रह्मण्य शर्मा, के.टी. माधवन् अन्ये च।

### परिचर्चा

गुरुवायूरु-परिसरे 13-11-08 दिनाङ्के "वर्णनशास्त्रविषये राष्ट्रियः परिचर्चा-कार्यक्रमः प्रवृत्तः। परिसरीयसभाभवने आयोजितम् एनं कार्यक्रमं कालिकट्-विश्वविद्यालयस्य भाषासङ्कायप्रमुखः आचार्यः सी.राजेन्द्रन् महोदयः उदघाटयत्। परिसरप्राचार्यः के.टी.माधवः प्रास्ताविकभाषणम् अकार्षीत्। महाभारते विद्यमान-वर्णनात्मकतामाधारीकृत्य विद्वत्परिचर्चा अभवत्।

### राष्ट्रियसङ्गोष्ठी

2-12-08 दिनाङ्के 'आयुर्वेदे शोधप्रविधौ च न्यायशास्त्रस्य प्रभावः उपयोगिता च' इति विषये राष्ट्रिया सङ्गोष्ठी गुरुवायूरु- परिसरेणायोजिता। सङ्गोष्ठ्यां गुरुवायूरुस्थ-श्रीकृष्णकलाशालायाः डा. के.वी वासुदेवः 'आयुर्वेदे न्यायशास्त्रप्रभावः' इति विषयमधिकृत्य भाषितवान्। 'शोधप्रविधौ न्यायशास्त्रोपयोगिता' इति विषयमवलम्ब्य डा. के.के. अम्बिकादेवी (कालडी) व्याख्यानमकरोत्। विषयेऽस्मिन् विदुषां परिचर्चानन्तरं डा. के.ई. मधुसूदनः अध्यक्षीयभाषणमकरोत्। प्राचार्यः आदौ सङ्गोष्ठीमधिकृत्य उपोद्घातात्मकं भाषणमकरोत्।

### भोपालपरिसरे वार्षिकोत्सवः

संस्थानस्य भोपालपरिसरस्य वार्षिकोत्सवः 11-12-08 तमे दिनाङ्के अपराह्णे प्रवृत्तः। कार्यक्रमे इण्डियन्-एक्सप्रेस् पत्रिकायाः भोपालसंस्करणस्य सम्पादकचरः श्रीमान् नारायणदत्तशर्मा मुख्यातिथित्वेन समुपस्थितः आसीत्। संस्थानकुलपतेः आचार्यस्य राधावल्लभत्रिपाठिमहोदयस्य आध्यक्ष्ये प्रवृत्तायां सभायाम् आरम्भे श्रीनिवासशास्त्रिणा मङ्गलाचरणं कृतम्। परिसरच्छात्राभिः सरस्वतीवन्दनं च विहितम्। परिसरप्राचार्यः आचार्यः प. ना. शास्त्रिवर्यः स्वागतभाषणपुरस्सरं परिसरीय- वार्षिकप्रतिवेदनं प्रास्तुवत्। कुलपतिवर्येण अध्यक्षभाषणे उद्बोधितं यत् 'संस्कृतच्छात्रैः अत्र जीवनस्य विविधक्षेत्रेषु परिसरे अधीतविषयाणां सदुपयोगपूर्वकं समाजस्य अभ्युत्थानाय प्रयासो विधेयः' इति। वार्षिकोत्सवम् उपलक्ष्य आयोजितप्रतियोगितासु विजयिभ्यः मञ्चस्थाः अतिथिवरेण्याः पुरस्कारप्रदानम् अकुर्वन्। अस्मिन्नेव प्रसङ्गे परिसरीयाध्यापकेन डा. सुज्ञानकुमारमोहान्तिना सम्पादितस्य सङ्क्रमनीसुबोधिनीवृत्तिद्वययुतस्य अभिधावृत्तिमातृका- पुस्तकस्य लोकार्पणं कुलपतिमहोदयेन कृतम्। बोधकुमारझामहोदयः सर्वेभ्यः धन्यवादान् प्राकटयत्।




वार्षिकोत्सवारम्भे दीपं प्रज्वालयन् कुलपतिः राधावल्लभ-त्रिपाठी, वामतः प.ना. शास्त्री, नारायणदत्तशर्मा च।

**सेवाकालं पूरयित्वा भगवान् मझी** - राष्ट्रियसंस्कृतसंस्थाने मुख्यालये 25-09-1972 तमे वर्षे प्रविष्टः चतुर्थवर्गकर्मचारी श्री भगवान् मझीः 31-10-2008 दिनाङ्के सेवानिवृत्तः अभवत्। तस्मिन् दिने मुख्यालये अपराह्णे आयोजितसभायां सः सहयोगिभिः कुलपतिवर्येण च अभिनन्दितः।

**प्रोन्नतः कर्मचारी** - संस्थानमुख्यालये कार्यरतः वरिष्ठ-लिपिकः श्रीरूपजीलाल मीना कार्यालयसहायकत्वेन प्रोन्नतः।

संस्थानेन ऐषमः नवदेहलीपुस्तक-मेलायां, केरलेषु कोच्चिन् इत्यत्र प्रवृत्तायाम् अन्ताराष्ट्रियपुस्तकमेलायां, जयपुरपुस्तक-मेलायां च संस्थानप्रकाशनानां प्रदर्शिनी आयोजिता। देहल्याम् कृतप्रदर्शिन्याः एकं दृश्यम् ⟶



## वार्षिकोत्सवः



श्री श्री भारतीतीर्थश्रीचरणानां दिव्योपस्थितौ वार्षिकोत्सवे भाषमाणः कुलपतिः राधावल्लभत्रिपाठी, मञ्चे आसीनः रा. देवनाथः च।

शृङ्गेर्यां राजीवगान्धीपरिसरस्य वार्षिकोत्सवः मार्गशीर्षकृष्णपञ्चम्यां (17-12-08) शनिवासरे परिसरसभाभवने शृङ्गेरीश्रीशारदापीठाधीशानां जगद्गुरूणां श्री श्री भारतीतीर्थमहास्वामिनां दिव्योपस्थितौ सम्पन्नः। नानाशास्त्रपारङ्गताः स्वामिपादाः स्वीयानुग्रहभाषणे उपस्थितान् उद्बोधयन्तः अवदन् यत् अस्माभिः शास्त्रपरम्परा सर्वथा परिरक्षणीया इति। अस्मत्पूर्वजैः आविष्कृतानि/साक्षात्कृतानि शास्त्राणि कैश्चित् महनीयचरितैः स्वाध्यायपरम्परया अद्य यावत् संरक्षितानि। तादृशशास्त्राणाम् अध्ययनपरम्परायाः उत्तरोत्तरं संरक्षणं संवर्धनं च अस्माकं कर्तव्यम्। अस्मत्पूर्वजानां कर्तव्यनिष्ठता, प्रामाणिकता इत्यादयः सद्गुणाः आत्मसात्करणीयाः इत्युपदिश्य स्वामिनः छात्रान् अनुगृहीतवन्तः। काव्येभ्यः सदाचारबोधकानि वचनान्युद्धृत्य काव्याध्ययनस्य प्रयोजनं च ते न्यरूपयन्। कार्यक्रमे विशिष्टातिथिरूपेण समुपस्थितः संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठिमहोदयः संस्थानस्य विविधनूतनयोजनानां विषये विस्तरेणोपन्यस्तवान्। छात्राणां सर्वाङ्गीणविकासाय शास्त्रपरम्परायाः संवर्धनाय च संस्थानेन क्रियमाणान् प्रयत्नान् प्रकटय्य, वार्षिकोत्सवभाषणेन छात्रान् अध्यापकांश्च सम्प्रैरयत्। परिसरस्य वार्षिकस्पर्धासु विजयिभ्यः कुलपतिवर्यः पुरस्कारान् प्रायच्छत्। कार्यक्रमस्यादौ परिसरप्राचार्यः रा.देवनाथः स्वागतवचनपुरस्सरं परिसरक्रियाकलापान् व्यवृणोत्।

**विशिष्टव्याख्यानम् –** श्रीशारदाविशिष्टव्याख्यानमालायाः पञ्चमम् व्याख्यानं 20-10-08 दिनाङ्के प्रवृत्तम्। व्याख्यानकर्तृत्वेन आचार्यः का.ई. देवनाथमहोदयः (दर्शनसङ्कायप्रमुखः, रा.सं.वि. तिरुपतिः) समाहूत आसीत्। उदयनाचार्यस्य न्यायकुसुमाञ्जलिं अधिकृत्य तेन विद्वद्वर्येण सुललितया रीत्या कृतम् उद्बोधनं जिज्ञासुभ्यः भृशम् अरोचत।

17-11-08 दिनाङ्के शारदाविशिष्टव्याख्यानमालायाः षष्ठं व्याख्यानं सुविदित-मीमांसकेन विदुषा श्रीमणिद्राविडशास्त्रिवर्येण 'मीमांसान्यायानां शास्त्रान्तरेषु उपयोगः' इति विषयमवलम्ब्य प्रदत्तम्। उपर्युक्तप्रसङ्गद्वये अपि व्याख्यानान्ते परिसरप्राचार्यः व्याख्यानकर्तारौ विद्वांसौ श्रीफलोत्तरीयादिभिः सम्मानयत्।

**वाक्यार्थपरिषद् –** परिसरीयवाक्यार्थपरिषदः पञ्चममधिवेशनं 21-10-08 तमे दिनाङ्के प्रवृत्तं यत्र डा. सुब्रायभट्टः, डा. राघवेन्द्रभट्टः श्री के. गिरिधरः च क्रमशः शब्दार्थविचारः, काव्यस्वरूपम्, सर्जनात्मकता इत्येतेषु विषयेषु विचारं प्रास्तुवन्। परिसरीयविद्वद्भ्यां चन्द्रशेखरभट्ट-भगवानसामन्तरायाभ्यां सभाकार्यक्रमः सञ्चालितः। 25-11-08 दिनाङ्के डा. महाबलेश्वरभट्टस्य मार्गदर्शने प्रवृत्ते वाक्यार्थपरिषदः षष्ठे अधिवेशने डा. नवीनहोल्लः 'अन्यथाख्यातिः' इति विषये, डा. भगवान् सामन्तरायः 'ब्रह्मविचारः' इति विषये, श्री मधुकेश्वरभट्टः 'तपरस्तत्कालस्य' इति विषये, श्री अनन्तकृष्णः व्युत्पत्तिवादमाश्रित्य 'तृतीयार्थविचारः' इति विषये च वाक्यार्थविचारमकरोत्।

**कार्यशाला –** शिक्षाशास्त्रकक्ष्यायाः पाठ्यक्रमं समीक्ष्य, पर्यालोच्य अपेक्षितपरिवर्तनं/परिवर्धनं वा सूचयितुं शिक्षाशास्त्रज्ञानां कार्यशाला एका नवम्बरमासस्य प्रथमद्वितीयदिनयोः सम्पन्ना। अत्र शिक्षाशास्त्रविभागाध्यापकाः सुविचारितचर्चापुरस्सरं प्रथमद्वितीयतृतीयपत्राणां बिन्दुशः पाठसंरचनां सज्जीकृतवन्तः।

**कार्यालयकर्मचारिणां नैपुण्यवर्गः –** परिसरस्य कार्यालयकर्मचारिणां तदीयकार्यकौशलसंवर्धनाय दशदिनात्मकः नैपुण्यवर्गः (12-11-08 तः 21-11-08 पर्यन्तम्) परिसरे आयोजितः। परिसरप्राचार्यः रा.देवनाथः कार्यालयनिर्वहणसम्बद्धेषु प्रशासनसम्बद्धेषु च विविधविषयेषु कर्मचारिणः दशसु दिवसेषु उदबोधयत्। अन्ते स्वयंमूल्याङ्कनार्थं परीक्षा अपि आयोजिता आसीत्। अस्मिन् कार्यक्रमे परिसरीयकार्यालयसदस्याः सोत्साहं भागमगृह्णन्।

**सांस्कृतिकरिक्थप्रदर्शिनी –** भारतीयसंस्कृतेः, परम्परायाश्च वैशिष्ट्यस्फोरणात्मिका एका प्रदर्शिनी परिसरीयविदुषा डा. रामचन्द्रलवालाजीद्वारा शृङ्गगिरौ, शृङ्गगिरिं परितः च विद्यमानासु विद्यासंस्थासु व्यवस्थापिता। 'सांस्कृतिक-पारम्परिक-रिक्थविषयप्रदर्शनकार्यक्रमः भारतशासनस्य संस्कृतिमन्त्रालयेन प्रायोजितो वर्तते।

शृ ङ्गे री प रि स रे

शि क्षा दि व सः प रि पा लि तः

**लखनऊ परिसरे** – 11-11-2008 दिनाङ्के प्राचार्यस्याध्यक्ष्ये समायोजिते शिक्षादिवसाख्ये कार्यक्रमे आचार्यः महेशसिंहकुशवाहा मुख्यातिथिरूपेण समागत्य भाषणप्रतियोगितायां विजेतॄन् छात्रान् पुरस्कारैः सभाजितवान्, शिक्षाविषयकं तत्त्वावगाहिव्याख्यानं च दत्तवान्। नगरपार्षदः श्रीरामकृष्णयादवस्तत्र विशिष्टातिथिरभूत्।



**इलाहाबादपरिसरे** – 11-11-08 शिक्षादिवसमुपलक्ष्य परसरीयगोष्ठी समायोजिता। अयं कार्यक्रमः प्राचार्यायाः डा. शैलकुमारी-मिश्रायाः आध्यक्ष्ये सायं 4.00 तः 6.00 वादनं यावत् प्राचलत्। डा. अपराजितामिश्रया सञ्चालितम् अस्याम् सभायाम् डा. ललितकुमारत्रिपाठी, डा. प्रदीपकुमारपाण्डेयः, डा. रामकिशोरझा, डा. शैलजापाण्डेया च वक्तृरूपेणोपस्थाय शिक्षायाः उद्देश्यादिविषये स्वीयान् विचारान् व्यक्तीकृतवन्तः।


**शृङ्गेरी**

राष्ट्रियशिक्षादिवसमुपलक्ष्य परिसरे 11-11-08 तमे दिनाङ्के शिक्षाशास्त्रविषयिणी राष्ट्रियसङ्गोष्ठी समायोजिता। एकादशविद्वद्भिः स्त्रीशिक्षा, अन्तर्भावितशिक्षा, प्राचीनभारतीयशिक्षा, इत्यादिविषयेषु स्वीयानि शोधपत्राणि प्रस्तुतानि। सङ्गोष्ठ्याम् उडुपि-नगरस्थ-डा.टी. एम्.ए.पै. शिक्षामहाविद्यालयस्य प्राचार्यः डा. महाबलेश्वररावः, शृङ्गेरीस्थ-जे.सी.बी.एम्. महाविद्यालयस्य विभागाध्यक्षः आचार्यः रामकृष्णः च सत्रद्वये आध्यक्ष्यं निरूढवन्तौ। कार्यक्रमः डा. एपी. सच्चिदानन्देन, डा. रमाकान्तमिश्रेण च संयोजितः।

**जयपुरपरिसरे** – 11-11-08 दिनाङ्के शिक्षादिवसमुपलक्ष्य छात्राणां कृते स्तरत्रये निबन्धप्रतियोगिताः आयोजिताः। डा. सन्तोषमित्तल्, इत्यस्याः संयोजकत्वे डा. उमाकान्तचतुर्वेदी, डा. विष्णुकान्तपाण्डेयः, श्रीकुलदीपशर्मा इत्येतेषां सहयोगेन कार्यक्रमः सम्पन्नः।



शोध का संस्कृत से गहरा नाता



# Talking it back to life

**EVENT** Rashtriya Sanskrit Sansthan is hosting a three-day festival of plays

THE HINDU, Delhi Monday, 24-11-08

But, far from the metropolitan cities with their unwieldy tossed salad of languages whose primary aim is to aid the survival of the fittest, there are still a few pockets in the country where Sanskrit is continues to be a part of daily life. The Rashtriya Sanskrit Sansthan, Janakpuri, a deemed university, is one body in the Capital devoted to the promotion of this ancient language that is at once poetic and scientific.

What better way to promote a language than through creative projects like stage shows? Thus the university organises an annual festival of plays by students of Sanskrit drawn from establishments across the country. What is noteworthy about the festival is the number of people using Sanskrit as a medium of communication. This year, the festival, Kaumudi Mahotsav, takes place at New Delhi's Little Theatre Group auditorium

## अस्माकं प्रतिभावन्तः छात्राः

राष्ट्रियसंस्कृतसंस्थानस्य 2007-2008 वर्षस्य वार्षिकपरीक्षायां विविध-विषयेषु सर्वाधिकान् अङ्कान् प्राप्तवतः एतान् छात्रान् अभिनन्दति संस्थानपरिवारः–

| | छात्राः | कक्षा/परिसरः/संस्था |
|---|---|---|
| 1. | शारदा कुमारी | नव्यव्याकरणाचार्यः (गरलीपरिसरः) |
| 2. | सुधीरकुमारः | साहित्याचार्यः (शृङ्गेरीपरिसरः) |
| 3. | अवधेशकुमारः | सिद्धान्तज्योतिषाचार्यः (भोपालपरिसरः) |
| 4. | सीमा शर्मा | फलितज्योतिषाचार्यः (जयपुरपरिसरः) |
| 5. | सुस्मिता बेहरा | सर्वदर्शनाचार्यः (पुरीपरिसरः) |
| 6. | श्रीलेखा पंडा | धर्मशास्त्राचार्यः (पुरीपरिसरः) |
| 7. | अनुसूया देवी | पुराणेतिहासाचार्यः (पुरीपरिसरः) |
| 8. | सुनीता रानी साहू | पुराणेतिहासाचार्यः (पुरीपरिसरः) |
| 9. | परसाद सरजू दास भगत | अद्वैतवेदान्ताचार्यः (दर्शनं सं.म.वि., उमरेठी गुजरात) |
| 10. | चेतना त्रिभुवनिवेदी | शुक्लयजुर्वेदाचार्यः (वटुकनाथसं.म.वि., वाराणसी) |
| 11. | प्रदीपकुमारद्विवेदी | बौद्धदर्शनाचार्यः (लखनऊ-परिसरः) |
| 12. | पुष्पलता मिश्रा | साङ्ख्ययोगाचार्यः (पुरीपरिसरः) |
| 13. | अनन्तकृष्णः | नव्यन्यायाचार्यः (शृङ्गेरीपरिसरः) |
| 14. | एस्.आर्. नागराजः | मीमांसाचार्यः (शृङ्गेरीपरिसरः) |
| 15. | प्रसादः डी.वी. | अद्वैतवेदान्ताचार्यः (गुरुवायूरुपरिसरः) |
| 16. | शशिभूषणसेनापतिः | शिक्षा-आचार्यः (जयपुरपरिसरः) |
| 17. | जितेन्द्रकुमारः | शिक्षाशास्त्री (शृङ्गेरीपरिसरः) |
| 18. | रमेशः आर् | शास्त्री (रामकृष्ण-आदर्शसं.म.वि., अरुणापुरम्) |
| 19. | अनिरुद्धकरः | उत्तरमध्यमा (रामकृष्णमठः, वि.वे.वि., बेलूरमठः) |
| 20. | तारा कुमारी | प्राक्-शास्त्री (डा. मदनमिश्र-सं.म.वि., बिहार) |
| 21. | शैलादित्यहलधरः | पूर्वमध्यमा (रामकृष्णमठः, वि.वे.वि., बेलूरमठः) |
| 22. | लक्ष्मणदीपः | प्रथमा (लज्जाराम-सं.म.वि., जिन्द, हरियाणा) |

## राज्यस्तरे विजयमाप्ताः शृङ्गेरीपरिसरच्छात्राः

कर्णाटकसर्वकारेण नवम्बर 9, 10 दिनाङ्कयोः स्वर्णवल्यां श्रीराजराजेश्वरीमहापाठशालायाम् आयोजितासु राज्यस्तरीयशास्त्रवाक्प्रतियोगितासु अधोनिर्दिष्टरीत्या परिसरच्छात्राः विजयिनो भूत्वा पुरस्कारभाजः अभवन्।

| | | |
|---|---|---|
| मीमांसाभाषणे | प्रथमः | विनायकः जि. भट्टः (आ.द्वि.व) |
| साङ्ख्यभाषणे | प्रथमः | तेजस्वी भट्टः (आ.प्र.वर्षम्) |
| व्याकरणशलाकायाम् | प्रथमः | प्रमोदभट्टः (आ.प्र.व.) |
| काव्यशलाकायाम् | प्रथमा | सौम्या के.आर्. (आ.प्र.व.) |
| व्याकरणभाषणे | द्वितीया | प्रियव्रतमिश्रः (आ.द्वि.व.) |
| व्याकरणभाषणे | तृतीया | कुमुदायन् (आ.प्र.व.) |
| ज्योतिषभाषणे | तृतीयः | विनायकरजतः (आ.द्वि.व.) |
| साहित्यभाषणे | तृतीया | अश्विनी एस्.हेगडे (आ.प्र.व.) |
| न्यायशलाकायाम् | तृतीयः | गानमूर्तिः (आ.प्र.व.) |

## पुरस्कृताः छात्राः

- श्रीरामकृष्णः (आ.प्र.व.) श्रीकरः (आ.द्वि.व.) इत्येतौ शृङ्गेरीपरिसरच्छात्रौ मैसूरुनगरे 23-11-08 दिनाङ्के महाराजसंस्कृतमहापाठशालायां समायोजितायां **वेदान्त-वाक्प्रतियोगितायां** भागं गृहीतवन्तौ। स्पर्धायां तृतीयस्थानं प्राप्तवता आयुष्मता रामकृष्णेन **त्रिसहस्ररूप्यकाणां पुरस्कारराशिः** प्राप्तः। वर्धिष्णुः श्रीकान्तः पञ्चशतस्य रूप्यकाणां सान्त्वनापुरस्कारेण समेधितः।
- पुणेस्थ-वेदशास्त्रोत्तेजकसभया सञ्चालितायां शास्त्रपरीक्षायां शृङ्गेरीपरिसरस्य व्याकरणाचार्य-द्वितीयवर्षस्य छात्रः श्री विनायकरजतः, व्याकरणाचार्यप्रथमवर्षच्छात्रः श्री प्रमोदभट्टः च उत्तीर्णतां प्राप्तवन्तौ। उभाभ्यामपि सार्धैकसहस्र-रूप्यकाणां पुरस्कारः प्राप्तः।

# छात्रप्रातिभम्

## विविधस्थानेषु संस्थानच्छात्राणां प्रातिनिध्यम्

- जादवपुरविश्वविद्यालयेन कोलकातायां 1-11-08 तः 7-11-08 पर्यन्तम् आयोजिते तृतीय-अन्तर्विश्वविद्यालययुवनायकत्वशिबिरे पुरीस्थसदाशिवपरिसरस्य छात्रौ श्री प्रवणनकुमारः, श्री महावीरमहाराणा च भागं गृहीतवन्तौ।
- मध्यप्रदेशे वर्धी इत्यत्र कमलनयनबजाजस्मृतौ आयोजितायाम् अन्तर्विश्वविद्यालयभाषण-प्रतियोगितायां भोपालपरिसरस्य आचार्यप्रथम-वर्षच्छात्रः श्री दीपकतिवारी, शृङ्गेरीपरिसरस्य आचार्यद्वितीयवर्षच्छात्रः श्री यदुवीरस्वरूप-ब्रह्मचारी च भागं गृहीतवन्तौ।

## राष्ट्रियसंस्कृतसंस्थानस्य संस्थापकनिदेशकानां सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कामेश्वरसिंहसंस्कृतविश्वविद्यालयस्य च कुलपतिचराणां विद्वद्वरेण्यानां कवितल्लजानां

# श्रीमतां रामकरणशर्मणां

## करकमलयोः संस्थानस्य स्थापनादिवसे समर्पितम् अभिनन्दनपत्रम्

अयि संस्कृतसेवाव्रतिनः कृतिनः सहृदय आचार्यवर्य!

पुण्यचरणलोलानां शालीनानां श्रीमतां निरलसनिर्व्याजनिरपेक्षव्यापारैः सदैव प्रोद्दीप्तमनुभवन्ति संस्कृतज्ञाः साहित्यरसज्ञाः सुधियः, दर्शं दर्शं श्रीमतां वात्सल्यमयीं सौम्यामाकृतिं स्मरन्ति च सुकवेर्भर्तृहरेरिमां सूक्तिम्-

मनसि वचसि काये पुण्यपीयूषपूर्णास्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः।

परगुणपरमाणून् पर्वतीकृत्य नित्यं निजहृदि विकसन्तः सन्ति सन्तः कियन्तः॥

अयि विश्वविश्रुतकीर्तिक दिगन्तरालविस्तृतयशः सम्मानभाजन!

निखिलेऽपि जगतीतले यत्र यत्र संस्कृतविद्याविमर्शकाः सन्ति तेषु विद्वद्विमर्शविभववद्भिः 'यत्र विश्वं भवत्येकनीडम्'-मिति अनुध्यानानां चिरन्तं यशोधनैर्भवद्भिः विपुलवाङ्मयरत्नसमर्पणेन नवनवोन्मेषशालिनी प्रतिभा विशीर्णा, चीर्णं यशः, शौर्यं च दुःस्थावस्थादुर्गमिम्। प्रतिमिष्यमाणविद्याविलासानां छात्राणां मनसि सन्ततं ... श्रीमतां कोलम्बिया-शिकागो- बर्कले-प्रभृति-विश्वविद्यालयेषु अतिथ्याचार्यत्वेन नेतृत्वे कीर्तिः। तथैव साहित्याकादेमीपुरस्कार-बिड़लावाचस्पतिसम्मान-वाचस्पतिसम्मान-पद्मश्रीसम्मानप्रभृतिभिः सम्मानैर्भवद्भिर्यद्विभूषितं तद्धि स्वदेशस्य पुरस्काराः सम्मानास्तेन सम्मानास्ते प्रतिष्ठिताः।

महाभाष्यमनुसन्धानस्य नवीना दिशा उन्मीलिताः श्रीमद्भिः, भाषाशास्त्रे व्याकरणे च सफलं फलं चिरन्तनं स्वालोके प्रकटीकृतम्। किं बहुना, भवतां स्फटिकविशदे मानसे मानसे हंस इव क्वचित् पाणिनिः, क्वचिच्च कात्यायनः, क्वचित् पतञ्जलिः, क्वचिच्च भर्तृहरिः, क्वचिच्च यास्कः, क्वचिच्च शुक्लोक्तिः स्वैरं विहरन्ति। प्रतिश्वासं सरसरूपः रसमयी सफलमनुभवन्तु शास्त्राणि उच्छ्वसन्ति, शाश्वतिकी प्रज्ञा प्राणिति, कविकर्म प्रतिविम्बति।

अयि सुकवे!

भवद्भिः अखण्डे सकलजगतीगगने क्वचित् 'गानवाणी'-गुञ्जनं, क्वचित् 'दीपिका'-दीप्तं, क्वचित् 'सन्ध्या'-चलितः, क्वचित् 'पत्र'-सौन्दर्यं, क्वचित् 'शिवोवालो'-स्वामलता च व्यञ्जितानि, भवता सदा अकालेन चोदितः। अकालजविपिनमिव आश्विनान्तरेऽकुर्वता भवतामभिकृत्य कुमारसुधां केनापि-

आकाशकवेः कविता विविधं स्फटति नवं नवं नित्यम्।

अक्काशं व्यक्तो सोऽयं चार्न्येव सूक्ष्मम्॥

अन्यच्चेदं कामयामहे–

भवसम्भाषणः सुकल्पकरणः काव्यप्रपूर्णैर्बुधः

देवीसाम्यकरणः शुभस्य चरणः शीलस्य सद्गेहकः।

मानानां हरणस्य संस्मरणः वाग्भक्तिसंवेदितः

जीवेद् विश्रवः स रामकरणः शर्मा शतं वै समाः॥

शाके 1930, विक्रमे 2065

कार्तिककृष्णप्रतिपत्।

15 अक्टोबर, 2008

कुलपतिना सह

राष्ट्रियसंस्कृतसंस्थानपरिवारः




स्थापनादिवसोत्सवे रामकरणशर्मभ्योऽदेयं सम्मानम्, संस्थानकुलपतिः, चित्रे दृश्यते नामपत्रिकं च।

## शिक्षाशास्त्रिप्रवेशसूचना प्रकटिता

2008-09 शैक्षिकसत्रस्य शिक्षाशास्त्रिप्रवेश- प्रक्रियाङ्गतया पूर्वशिक्षाशास्त्रिपरीक्षा ( पू.शि.शा.प - 08) 16.5.2009 दिनाङ्के शनिवासरे पूर्वाह्ने समग्रे देशे निश्चितकेन्द्रेषु भविता। 10 + 2 + 3 शिक्षाक्रमे संस्कृतविषयेण सह स्नातकपरीक्षायाम् उत्तीर्णाः/वर्षत्रयस्य स्नातकपरीक्षां संस्कृतविषयेण सह उत्तीर्य सेतु परीक्षाम् संस्कृते आचार्य प्रथमवर्षपरीक्षाम् वा उत्तीर्णाः/ संस्कृते आचार्यपरीक्षाम् उत्तीर्णाः पू. शि. शा. प. (PSST) निमित्तम् आवेदयितुमर्हाः। संस्कृतविषयेण सह स्नातकस्तरस्य तृतीयवर्षपरीक्षां ये एतस्मिन् शैक्षिकवर्षे लेखिष्यन्ति तेऽपि आवेदयितुमर्हन्ति। एतद्विषये विस्तृतविवरणसहिता मार्गदर्शिका आवेदनपत्रेण सह संस्थानमुख्यालयस्य परीक्षाविभागे संस्थानपरिसरेषु च 01.2.09 तः 20.3.09 दिनाङ्कं यावत् उपलप्स्यते। आवेदनपत्रशुल्कम्–साक्षात्क्रयणे – रू. 500/= (पत्रालयद्वारा (रू. 550/=)। एतस्मिन् विषये विज्ञापिका उद्योगवार्तायां (Employment News/रोज़गार समाचार 22-29 जनवरी 2009), संस्थानस्य विश्वव्यापिजाले (www.sanskrit.nic.in) अपि प्रकटिता भविष्यति।

Sanskritavarta : Quarterly News Bulletin of Rashtriya Sanskrit Sansthan Vol.I No.2 Pub. by the Registrar for Rashtriya Sanskrit Sansthan, 56-57, Institutional Area, Janakpuri, New Delhi-110058 & Printed at D.V. Printers, 97-U.B. Jawahar Nagar, Delhi-110007